नं. ४११५

नाम. भगवद्गीता
गूढार्थ दीपिका टीका
१८ शाध्याय:

क. श्री मधुसूदन सरस्वती.

पत्र सं. ४० —— सं. x

विषय: वेदान्त शास्त्रं
(महा भारते)

भगवद्गीताटीका गूढार्थदीपिका ष्टा
दशमाध्यायः

४९९५

4995

F. = 40

गी॰टी॰ अ॰ १८

सर्वाध्याये श्रद्धात्रैविध्येनाहारयज्ञतपोदानत्रैविध्येन च कर्मसंगात्रैविध्यमुक्तं सात्त्विकानामादा-
नाय राजसतामसानां च हानाय। इदानीं तु संन्यासत्रैविध्यकथनेन च संन्यासिनामपि त्रैविध्यं
वक्तव्यं। तत्र तत्त्वबोधानन्तरं यः फलभूतः सर्वकर्मसंन्यासः स च चतुर्दशेऽध्याये गुणातीतत्वेन व्या-
ख्यातत्वान्न सात्त्विकराजसतामसभेदमर्हतीति योऽपि तत्त्वबोधात्प्राक् तदर्थं सर्वकर्मसंन्यासः
तत्त्वबुभुत्सया वेदान्तवाक्यविचाराय भवति सोऽपि। त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुने

अर्जुन उवाच

संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुं

त्यादिना निर्गुणत्वेन व्याख्यातः। यस्त्वनुत्पन्नतत्त्वबोधानामनुत्पन्नतत्त्वबुभुत्सानां च कर्मसं-
न्यासः स संन्यासी च योगी चेत्यादिना गौणो व्याख्यातः तस्य त्रैविध्यसंभवात्तद्विशेषबुभुत्सुरर्जु-
न उवाच॥ अविदुषामनुपजातविविदिषाणां च कर्माधिकृतानामेव किंचित्कर्मपरिग्रहेण
किंचित्कर्मपरित्यागो यः स त्यागो गौणगुणयोगात्संन्यासशब्देनोच्यते एतादृशस्यान्तःकरण

श्री ह रि ह — गौणत्यागसंन्यासस्य = २ — १

गौणसंन्यासस्य

फलोद्देशे नैव विविक्तितत्वरूपेण =१ काम्यकर्मत्यागत्वरूपेण कर्मत्यागस्य =१

विद्वत्कर्माधिकारिकर्तृकसंन्यासस्य केन विद्रूपेण कर्मत्यागस्य तत्त्वं स्वरूपं पृथक् सात्त्विकराजसतामसभेदेन वेदितुमिच्छामि त्यागस्य च तत्त्वं वेदितुमिच्छामि किं संन्यासत्यागशब्दौ घटपटशब्दा

जा विव भिन्नजातीयार्थौ ॥ किं वा ब्राह्मणपरिव्राजकशब्दाविव एकजातीयार्थौ ॥ यद्याद्यस्तर्हि त्याग

स्य तत्त्वं संन्यासात्पृथग्वेदितुमिच्छामि ॥ यदि द्वितीयस्तर्हि अवान्तरोपाधिमात्रेण वक्तव्यमेकत्वेनैवे ख्या

बोधयं व्याख्यातं भविष्यति ॥ महाबाहो केशिनिषूदनेति संबोधनाभ्यां बाह्याभ्यन्तरोपद्रवनिवारणे । महाबाहो इति =

त्यागस्य च हृषीकेश । पृथक्केशिनिषूदन ॥१॥

संन्यासत्यागविषयौ =२

केशिनिषूदनेति केशिनिषूदनेति

दा स्वरूपयोग्यताफलोपाधिनिप्रदर्शिते ॥ हृषीकेशेत्यन्तरुपद्रवनिवारणसामर्थ्यमिति भेदः । अ

त्यनुरागात्संबोधनद्वयं ॥ अत्रार्जुनस्य द्वौ प्रश्नौ कर्माधिकारिकर्तृकत्वेन सर्वोक्तयज्ञादिसाधर्म्य

णसंन्यासशब्दप्रतिपाद्यत्वेन च गुणातीतसंन्यासद्वयसाधर्म्येण त्रैगुण्यसंभवाभ्यां संशयः । विद्वत्संन्यास

प्रथमस्य प्रश्नस्य बीजं द्वितीयस्य तु ॥ संन्यासत्यागशब्दयोः पर्यायत्वात्केवलं तत्फलत्यागरूपे विविदिषास

संन्यासतत्वं प्रश्नस्य णाच वेलक्षण्ये के संशयो बीजं ॥१॥ संभवा न्यासः =२

त्यागतत्वप्रश्नस्य संशयो बीजमित्यर्थः =१ कर्मणः स्वरूपतस्त्यागः फलस्य च त्यागः =१

तमेतमित्यादिविनियोगविधेर्नियमार्थत्वादित्यस्यायमर्थः संध्योपासनादिकर्माणि श्रुतिविधानि नित्यानि काम्यानि च ... फलमूर्ध्वं विहितत्वात्तानि नित्यानि ... फलेन ... फलोद्देशेन विहितानि काम्यानि २ त्वनूसंदेतत्

नन्वसर्वे = १

गीटी० मस्त्र० २

तत्रोत्तिमस्य सूचीकटाहन्यायेन निराकरणायोत्तरमाह श्रीभगवान् । काम्यानां फलकामनया चो-
दितानां अतः करणाशुद्ध्यावनुपयुक्तानां कर्मणां निषिद्धप्रसोमादीनां न्यासं त्यागं संन्यासं विदुः
जानंति कवयः सूक्ष्मदर्शिनः केचित् ॥ तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति । यज्ञेन दानेन
तपसानाशकेनेत्यादिवाक्येन वेदानुवचनशब्दोपलक्षितस्य ब्रह्मचारिधर्मस्य यज्ञदानशब्दा-
भ्यामुपलक्षितस्य गृहस्थधर्मस्य तपोनाशकशब्दाभ्यामुपलक्षितस्य वानप्रस्थधर्मस्य नित्यस्य
नित्येन हि तेन पापक्षयेण शुद्धे रागात्मज्ञानार्थत्वं बोध्यते तेन च विनियोगवैयर्थ्यं ॥ ज्ञानमत्य

श्रीभगवानुवाच ॥ काम्यानां कर्मणां न्यासं । संन्यासं कवयो विदुः
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ २ ॥

यत्तेषु संन्यासपरस्य कर्मणा उत्पन्नेनैव लब्धत्वादिति वाच्यं । विनियोगाभावे हि सत्यपि नित्यक-
र्मानुष्ठाने ज्ञानं स्याद्वा न स्यात् ॥ सति तु विनियोगे ज्ञानमवश्यं भवेदिति नियमार्थत्वात् ॥ त-
स्मान्नित्यकर्मणामेव वेदनेविविदिषायां वा विनियोगात्तत्त्वशुद्धिविविदिषात्पत्तिर्द्वारेण केवे-
दनार्थिना नित्यान्येव कर्माणि आ भवेदयं याबुद्धान्तु ष्ठेयानि काम्यानि तु सर्वाणि सफलानि प-
रित्याज्यानीत्येकं मतं ॥ अपरं मतं ॥ सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ ॥ ॥

२

इति संशयः स्यात् = २

ग

पूर्वव्याख्याने ... लोकप्राप्तिः कर्मणा पितृलोक ... इति श्रुतेः तमेतं वेदानुवचनेनेत्यादिवाक्येन ब्रह्मज्ञाने विनियुक्तानि तु काम्यानि ब्रह्मज्ञाने ...
... ज्ञानं न भवेद्वा न भवेत् तत्तद्द्वेश ... तमेतमित्यादिवाक्ये न विनियोगे मति ज्ञानोद्देशेन कृते ... गुरु ... शास्त्राधिकारादि लाभ प्रयोज ...

सर्वेषांकाम्यानांनित्यानांचप्रतिपदोक्तफलत्यागंसन्न्यासशब्दार्थंतयाविविदिषासंयोगेनानुष्ठानमेविचक्ष
णाविचारकुशलास्त्यागंप्राहुः।खादिरोयूपोभवति।खादिरंवीर्यकामस्ययूपंकुर्वीतेत्यत्रयथैक
स्यखादिरत्वस्यक्रतुप्रकरणपाठात्फलसंयोगाच्चक्रत्वर्थत्वंपुरुषार्थत्वंचप्रमाणभेदात्।तथाग्नि
होत्रेष्टिपशुसोमानांसर्वेषामपिशतपथपठितानांस्वोत्पत्तिविधिसिद्धानांतत्तत्फलसंयोगःप्रत्येक
वाक्येनविविदिषासंयोगश्चयज्ञादिवाक्येनक्रियतइत्युपपन्नं।एकस्यतूभयत्वेसंयोगपृथक्त्वमिति
न्यायात्॥तदुक्तंसंक्षेपशारीरके।यज्ञेनेत्यादिवाक्यंशतपथविहितंकर्महृद्यंगृहीत्वाज्ञानायास्मि
न्।पुरुषविविदिषामात्रसाध्येयुनक्तीति।तस्मात्काम्यान्यपिफलाभिसंधिमकृत्वांतःकरण
शुद्धयेकर्तव्यानिनत्वग्निहोत्रादिकर्मणांस्वतःकाम्यत्वनित्यत्वयोःस्वरूपेविशेषोस्ति॥पुरुषा
भिप्रायभेदकृतस्तुविशेषःफलाभिसंधित्यागेकृतेतस्यःनित्यकर्मणांचप्रातिस्विकफलस्य।
ज्ञावमनिष्टमिष्टंमिश्रंचत्रिविधंकर्मणःफलमित्यत्रवक्ष्यति॥नित्यानामेवविविदिषासंयोगे
नकाम्यानांकर्मणांफलेनसहस्वरूपतोपिपरित्यागःपूर्वार्धस्यार्थः॥काम्यानांनित्यानांचसंयो
गपृथक्त्वेनविविदिषासंयोगात्तदर्थंस्वरूपेणानुष्ठानेपिप्रातिस्विकफलाभिसंधिमात्रपरित्या
गउत्तरार्धस्यार्थः।तदेतदाहुःवार्तिककृतः।वेदानुवचनादीनामैकात्म्यज्ञानजन्मने।तमेतमि
तिवाक्येननित्यानांवक्ष्यतेविधिः।यद्वाविविदिषार्थत्वंसर्वेषामपिकर्मणां।तमेतमितिवाक्येन
संयोगस्यपृथक्त्वतइति।तदेवंसकलकाम्यकर्मत्यागःसन्न्यासशब्दार्थःसर्वेषामेवकर्मणांफ

काम्यानामपि

कर्मणामपृथक्त्वे= सोमः ४

नृप स्वरूपेविशेषः=

नित्यानामभित्यन्वयः=

विधिः

कर्मणिलट्=सन्न्यासार्थः-२

काम्यानांनित्यानांच=८

गी॰टी॰ म॰अ॰ ३

ह्वार्थश्चेति न च द्वैशब्दयोरिव संन्यासत्यागशब्दयोर्भिन्नजातीयार्थत्वं ॥ किंतु अंतःकरणशुद्ध्यर्थं क
र्मानुष्ठाने फलाभिसंधित्यागश्चेत्येक एवार्थः उभयोरिति निर्णीतः एकः प्रश्नोऽर्जुनस्य ॥ २ ॥ अ
धुना द्वितीयप्रश्नप्रतिवचनाय संन्यासत्यागशब्दार्थस्यैकत्वे विध्यं निरूपयितुं तत्र विप्रतिप
त्तिमाह ॥ सर्वं कर्म बंधहेतुत्वाद्दोषवद्दुष्टं अतः कर्माणि कुर्वतैरपि कर्म त्याज्यमेवेति ॥ एके म सांख्याः

त्याज्यं दोषवदित्येके । कर्म प्राहुर्मनीषिणः । यज्ञदानतपःकर्म । न त्याज्यमिति चापरे ॥
॥ ३ ॥

नीषिणः प्राहुः । यद्वा दोषवत् ॥ दोषश्च यथा दोषो रागादिस्त्यज्यते ॥ तद्वत्कर्म त्याज्यं ॥ अन्ये तु
त्वेवाधैः अन्ये त्वविविदिषैः । कर्माणि कामैरभिरपीत्येकः पक्षः ॥ अत्र द्वितीयः पक्षः कर्मा
णि कामैरभिरंतःकरणशुद्धिद्वारा विविदिषोत्पत्त्यर्थं । यज्ञदानतपःकर्म न त्याज्यमिति चापरे २

मीमांसकाः

सत्त्वा

एवंविधप्रश्नविषयो॥ तत्र त्वयापृष्टे कर्माधिकारिकर्तृके संन्याससत्यागशब्दाभ्यां प्रतिपादिते त्यागे फलाभिसंधिपूर्वककर्मत्यागे मम मम वचनान्निश्चयं पूर्वाचार्यैः कृतं शृणु हे भरतसत्तम॥ किं तव दुर्ज्ञेयमस्तीत्यत आह। हे पुरुषव्याघ्र पुरुषश्रेष्ठ॥ हि यस्मात्त्यागः कर्माधिकारिकर्तृकः फलाभिसंधिपूर्वककर्मत्यागस्त्रिविधः त्रिप्रकारस्तामसादिभेदेन संप्रकीर्तितः। अथवा विशिष्टाभावद्रूपस्त्यागो विशेषणाभावाद्विशेष्याभावादुभयाभावाच्च॥ त्रिविधः संप्रकी

निश्चयं शृणु मे तत्र। त्यागे भरतसत्तम॥४

विशेषणाभावकृतः

र्तितः॥ तथाहि फलाभिसंधिपूर्वककर्मत्यागः सत्यपि कर्मणि फलाभिसंधित्यागादेकः सत्यपि फलाभिसंधौ कर्मत्यागो द्वितीयः फलाभिसंधेः कर्मणश्च त्यागस्तृतीयः। तत्र प्रथमः सात्त्विकस्त्यादयः द्वितीयस्तु हेयो द्विविधः दुःखबुद्ध्याकृतो राजसः विपर्यासेन कृतस्तामसः एता

ते

गी टि

कर्मत्यागः कर्मत्यागः

विशेष्याभावकृतः उभयाभावकृतः

नद्वि

मोधिकारिकर्तृकः त्यागोऽर्जुनस्य प्रश्नविषयः तृतीयस्तु कर्मानधिकारिकर्तृको नैर्गुण्यपदयो नार्जुन
गी.टी. प्रश्नविषयः॥ सोपि साधनफलभेदाद्विविधः। तत्र सात्त्विकेन फलाभिसंधित्यागपूर्वककर्मानुष्ठान
मस्र. नवैराग्यत्यागेन शुद्धान्तःकरणस्योत्पन्नविविदिषस्यात्मज्ञानसाधनश्रवणाख्यवेदांतविचाराय फ
४ लाभिसंधिरहितस्यान्तःकरणशुद्धौ सत्यां तत्साधनस्य कर्मणो वैतृष्ण्यजातत्वेनावहननस्य परि मु
त्यागः स एकः साधनभूतो विविदिषासंन्यास उच्यते॥ तमग्रे नैष्कर्म्यसिद्धिं परमामिति वक्ष्य
५ ति॥ द्वितीयस्तु जन्मान्तरकृतसाधनाभ्यासपरिपाकादस्मिन्जन्मन्यादावेवोत्पन्नात्मबोधस्य

त्यागो हि पुरुषव्याघ्र। त्रिविधः संप्रकीर्तितः॥४॥

कृतकृत्यस्य सत एव फलाभिसंधेः कर्मणां च परित्यागः फलभूतो विद्वत्संन्यास उच्यते। सत्व
यस्त्वात्मरतिरेव स्यादित्यादिश्लोकाभ्यां प्रागुपाख्यातः स्थितप्रज्ञलक्षणः रागादिभिश्चवर्जितया प्रा मु
यं पंचितः। यस्मादेवं त्यागस्य तत्त्वं दुर्ज्ञेयं यथा चोक्तं। तत्त्वं वेदितुमिच्छामीति। अतो मम सर्वज्ञस्य व
चनाद्धि हीत्यभिप्रायः। संबोधनद्वयेन कुलनिमित्तोत्कर्षः पौरुषनिमित्तोत्कर्षश्च योग्यताति ४

भित्र विषयज्ञात्वात्रयोरी वस्तुयोः परस्परं विरोधो यतो न हि स्यादिति सामान्यवाक्यस्य ग्रीवोमीयविशेषवाक्येन बाध्येतेति म, मते मीमांसकाः ग्रीषोमीयपशुलम्भनविधिना हिंसा या अनर्थसाधनत्वं बोध्यते न क्रत्वर्थीत्वं न हिंस्यादिति विधिना तु हिं

कोसौ निश्चयो यो विप्रतिपत्तिकोटिभूतयोः पक्षयोः द्वितीयः पक्षस्तत्राह द्वाभ्यां। योऽहं तौ। यस्माद्यज्ञदानतपांसि मनीषिणामकृतफलाभिसंधीनां पावनानि ज्ञानप्रतिबंधकपापमलक्षालनेन ज्ञानोत्पत्तियोग्यतारूपपुण्योत्पादनेन च शोधकानि अकृतफलाभिसंधीनामेव यज्ञदानतपांस्येव शोधकानि भवंत्येव उपायत्वेनोपहितबुद्धिस्त्वाभिप्रेता। तस्मादंतःकरणशुद्ध्यर्थिभिः कर्माणि कृतैः यज्ञो दानं तपइति यत्फलाभिसंधिरहितं कर्म तन्न त्याज्यं किंतु कार्यमेव तत्। अत्याज्यत्वेन कार्यत्वे लब्धेपि अपादानार्थं पुनः कार्यमेवेत्युक्तं। यस्मात्कार्यं[...]यनत्याविहितं तस्मान्न त्याज्यमेवेति वा। ५। यदि यज्ञदानतपसा अंतःकरणशोधनेन मामर्थमस्ति तर्हि फलाभिसंधिना कृतान्यपि तानि तच्छोधकानि भविष्यंति। कृतं फलाभिसंधित्यागेनेत्यत आह। नशब्दः शंकानिवारणार्थः यद्यपि काम्यान्यपि शुद्धिमादधति

यज्ञो दानं तपः कर्म न त्याज्यं कार्यमेव तत्। यज्ञो दानं तपश्चैव पावनानि मनीषिणां। ५॥
एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च। कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमं ६॥

धर्मस्वाभाव्यात्तथापि तानि तत्फलभोगाय योगिनस्ते व विहरणाद्देहेन नैवंबंधः भज्यते फलमिति ज्ञानोपयोगिनीं न शुद्धिमादधति यानि यज्ञादीनि कर्माणि एतानि फलाभिसंधिपूर्वकत्वेन बंधनहेतुभूतान्यपि मुमुक्षुभिः संगमहं करोमीति कर्तृत्वाभिनिवेशं फलानि चाभिसंधीयमानानि त्यक्त्वांतःकरणशुद्धये कर्तव्यानीति मे मम निश्चितं। अत एव हे पार्थ कर्माणि कृतैः कर्माणि त्याज्यानि न त्याज्यानि चेति द्वयोर्मतयोर्न त्याज्यानीति मम निश्चितं मतमुत्तमं श्रेष्ठं। यदुक्तं निश्चयं शृणु मे तत्रेति सोऽयं निश्चय उपसंहृतः भगवत्पूज्यपादानामभिप्रायोयमीरितः अग्निस्रोतत याभाष्ये दुरापोमंद

नज्ञानेवपेक्षिनी तदुक्तं वार्त्तिककृद्भिः काम्यापि शुद्धिरस्त्येव भोगमस्त्र्यार्थीमेव सा॥ ६

गी॰ टी॰ म॰ ५

तदेवं यज्ञदानतपःकर्म न त्याज्यमिति चापरे इति पक्षः स्थापितः। इदानीं त्याज्यं दोषवदित्येके कर्म प्रा-
हुर्मनीषिण इति। परपक्षस्य पूर्वोक्तत्यागत्रैविध्यव्याख्यानेन निराकरणमारभते। काम्यस्य कर्मणो-
ऽन्तःकरणशुद्धिहेतुत्वाभावेन बन्धहेतुत्वेन च दोषवत्त्वात्त्याज्यं यतिहतिहेतुत्वेन वा धार्थिना क्रियमाणस्या-
नुपपद्यत एव। नियतस्य तु नित्यस्य कर्मणः शुद्धिहेतुत्वेनादोषस्य संन्यासस्त्यागो मन्दत्वरणान्तःक-
रणशुद्ध्यर्थिना नोपपद्यते। शास्त्रयुक्तिभ्यां तस्यान्तःकरणशुद्ध्यर्थमवश्यानुष्ठेयत्वात्। तथा चोक्तं प्रा-
क्। आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते इति। ननु दोषवत्त्वं काम्यस्येव नित्यस्यापि दर्शपूर्णमा-
सज्योतिष्टोमादेरपि। तथा चोक्तं महाभारते। जपस्तु सर्वधर्मेभ्यः परमो धर्म उच्यते। अहिंसया
हि भूतानां जपयज्ञः प्रवर्तत इति। मनुनापि जप्येनैव तु संसिद्ध्येद्ब्राह्मणो नात्र संशयः। कुर्यादन्य-

या॰ ७ नियतस्य तु संन्यासः कर्मणो नोपपद्यते। मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ७ ॥

न्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते इति वदता मैत्रीमहिंसां प्रशंसता ॥ हिंसाया दुष्टत्वमेव प्रतिपादितं
अन्तःकरणशुद्धिश्रेष्ठेन गायत्रीजपादिना सुतरामुपपत्स्यत इति। हिंसादिदोषदुष्टं ज्योति-
ष्टोमादि नित्यं कर्म दोषास्तिहि स्नानाशनादिकमिव कर्माधिकारिणापि त्याज्यमिति प्राप्ते ब्रूमः।
न क्रत्वर्थाया हिंसाया अनर्थहेतुत्वं विधिस्पृष्टे निषेधानवकाशात्। तथा हि। विधिना बलवदिष्टविष-
यसाधनत्वबोधनरूपां प्रवर्तनां कुर्वता अनर्थसाधनत्वे तदनुपपत्तेः स्वविषयस्य प्रवर्तनागोचर-
स्यानर्थसाधनत्वाभावो बोध्यत इति तेन विधिविषयस्यानर्थहेतुत्वं युज्यते न हि क्रत्वर्थत्वं-
मादाहिंसार्थः येन विरोधो न स्यात्। किं तु प्रवर्तनैव प्रवर्तनाकर्मभूतानां पुरुषप्रवृत्तिः ७ ॥ ॥

स्वर्गादिपुरुषार्थसाधनज्योतिष्टोमादिक्रतुविषयकप्रवृत्तिविषयत्वेन = ६ पुरुषार्थप्रवृत्तेर्बलवदिच्छाविषयस्याभावस्यानर्थहेतु
तायाः प्रतिक्षेपकत्वाभावादेव = ७ अभिचारसाधनस्य श्येनस्य विधिजन्यप्रवृत्तिविषयत्वेनाभिचारस्य तु प्रकरणात् अभिचारस्यानुवाल स्य

पुरुषार्थमेव विषयीकुर्वती किंचित्कृतमपि पुरुषार्थसाधनत्वेन पुरुषार्थाभावमापन्नं विषयीकरोतीत्यत्र
पुरुषप्रवृत्तिश्च बलवदिच्छायदनंतरं शाद्यो जायमानानभाव्यस्यार्थहेतुतामपि द्विपर्तीन्वाऽनर्थहेतुतां प्र
तिपद्यते किंतु यथाप्राप्तमेवावलंबते बलवदिच्छाविषये स्वत एव प्रवृत्तेः स्वर्गादौ विध्यनपेक्षणात्
अतएव विहितश्येनफलस्यापि शत्रुवधरूपस्याभिचारस्यानर्थहेतुत्वा[...]पयुज्यत एव । फलस्य विधिज
न्यप्रवृत्तिविषयताभावात् । विधिजन्यप्रवृत्तिविषये तु यातवर्थ्यकरणप्रवर्तनावलंबते मा चेन्नानर्थहे
तुत्वं विषयीकरोतीति विशेषविध्यबाधितेन सामान्यनिषेधवाक्येन रागद्वेषादिमूला[...]कलनीयलौकिकहिं
साविषयं । तेन श्येनाग्नीषोमीययोर्वैषम्यादुपपन्नमदुष्टत्वं ज्योतिष्टोमादेर्विधिस्पृष्टस्यापि निषेधवि
षयत्वे षोडशीग्रहणस्याप्यनर्थहेतुतापत्तिर्नातिरात्रे षोडशिनं गृह्णातीति निषेधात् तस्मान्न किं
चिदेतदिति भाट्टदर्शनं प्राभाकरं तु दर्शनं फलसाधने रागात एव प्रवृत्तिसिद्धेर्न नियोगस्य प्रवर्तक
त्वं तेन श्येनस्य रागजन्यप्रवृत्तिविषयत्वेन विधेरौदासीन्यान्न तस्यानर्थहेतुत्वं विधिना प्रतिपद्यते
अग्नीषोमीयहिंसायां तु क्रत्वंगभूतायां फलसाधनत्वाभावेन रागाभावाद्विधिरेव प्रवर्तकः । स च स्व
विषयस्यानर्थहेतुतां प्रतिपद्यतीति प्रधानभूतां हिंसामनर्थं जनयति । न क्रत्वर्थमिति । नो हिंसामित्यत्रे
न ज्योतिष्टोमादेरदुष्टत्वमिति सममेव ॥ एतावन्मात्रे तु विशेषः चोदनालक्षणोऽर्थो धर्म इति अत्रार्थप
दव्यावृत्तत्वेनाधर्मत्वं श्येनादेः प्राभाकरमते भाट्टमते तु श्येनफलस्यैवाभिचारस्यानर्थहेतुत्वादध
र्मत्वं । श्येनस्य तु विहितस्य समीहितसाधनस्य धर्मत्वमेव अर्थपदव्यावर्त्यत्वं तु कलंजभक्षणादेरिति

इति भाट्टप्राभाकरमतम् = ३
स्वर्गसाधनत्वेनतु कीर्तेरेव = ५ लौकिकहिंसा = ७
हिंसायाः = ८

शत्रुवधस्य तत्साधनस्य श्येन
फलस्य साधनस्य चाहे
आवृत्तेन = २ साधनस्य

अनर्थाहेतुत्वम् = ४ अप्रमाणत्वमाधत्वम् = २

व्यवहारः । तदुक्तं । फलतोपि च यत्कर्म नानर्थेनानुबध्यते । केवलप्रीतिहेतुत्वात्तद्धर्म इति कथ्यते । किं का
गी॰टी॰ रणान्तदर्शनं कृतिसाध्यत्वमर्थहेतुत्वमनर्थाहेतुत्वं चेति त्रयं विध्यर्थः तत्र क्रत्वर्थहिंसायां साक्षान्निषे
म॰अ॰ धाभावात्प्रायश्चित्तानुपदेशाच्च कृतिसाध्यत्वार्थहेतुत्ववदनर्थाहेतुत्वमपि विधिना बोध्यत इति न
६ तस्याश्चानर्थहेतुत्वं श्येनादेस्त्वभिचारस्य साक्षादेव निषेधात्प्रायश्चित्तोपदेशाच्चानर्थहेतुत्वावग
मात्तावन्मात्रं तत्र विधिना न बोध्यते श्येनप्रपन्नं श्येनाग्नीषोमयोर्वैलक्षण्यं औपनिषदेस्तु भाष्य एव द
राम र्शने व्यवहारे प्रायेणावलंबितं तथा च भगवद्बादरायणप्रणीतं सूत्रं अशुद्धमिति चेन्न शब्दादिति ज्ये
मा तिष्टोमादिकर्म अग्नीषोमीयहिंसादिमिश्रत्वेनाशुद्धमिति चेन्न अग्नीषोमीयं पशुमालभेतेत्यादिवि
धिशास्त्रादित्यक्षरार्थः । जपप्रशंसापरं तु वाक्यं न क्रत्वर्थहिंसाया अधर्मत्वबोधकं तस्य तत्रातात्पर्या

दुःखमित्येव यत्कर्म । कायक्लेशभयात्त्यजेत् । स कृत्वा राजसं त्यागं । नैव त्यागफलं लभेत् ॥

८ ॥ तथा च संन्यासो नाविहिते निषिद्धत्वज्ञानमनर्थाहेतावनर्थहेतुत्वज्ञानमनिष्टे चानिष्टत्व
ज्ञाने विपर्यासरूपो मोहः तस्मान्मोहान्नित्यस्य कर्मणो यः । परित्यागः स तामसः परिकीर्तितः मोहो
हि तमः । ७ ॥ पूर्वोक्तमोहाभावेपि दुःखमिति अनुपजातान्तःकरणशुद्धितया कर्माणि कृतोपि दुः
खमेवेदमिति मत्वा कायक्लेशभयान्नित्यं कर्म त्यजेत् इति यत् स त्यागो राजसः दुःखं हि रजः अतः स
मोहरहितोपि राजसः पुरुषः । तादृशं राजसं त्यागं कृत्वा नैव त्यागफलं सात्त्विकत्यागस्य फलं ज्ञाननि ९

धर्मश्चाधर्मत्वज्ञान = ५ धर्मश्चाधर्मत्वज्ञानं = ५

येनकेनापि यागेन यजेत इत्यादि मंत्रः करणशुद्ध्यादिकं भावयेत् याज्यानुवाक्यादिमंत्रा यत्र हूयते स यागो ज्योतिष्टोमादिः तद्दशकौ दर्विहोमेन यजेत्
कुर्यात् ऋचा होमः स दर्विहोमोऽग्निहोत्रादिः यद्देकयाज्यया दर्विहोमं कुर्यादिति स्मृतेः अनुपहतमनाः शुद्धमना भवति =८

कर्मत्यागस्तामसो राजसश्चेति द्वयोर्दर्शितः कीदृशः पुनरुपादेयः सात्त्विकः त्याग इत्युच्यते कार्यमि
ति। विशुद्धेः फलाश्रवणेऽपि कार्यं कर्त्तव्यमेवेति बुद्ध्या नियतं नित्यं कर्म संगं कर्तृत्वाभिनिवेशं
फलं च त्यक्त्वैव यत्क्रियतेऽर्जुन अंतःकरणशुद्धिपर्यंतं स त्यागः सात्त्विकः सत्त्वनिर्वृत्तो मतः आदे
यत्वेन संमतः। शिष्टानां नन्वनित्यानां फलमेव नास्ति कथं फलं त्यक्त्वेत्युच्यते। अस्मादेव भग
वद्वचनान्नित्यानां फलमस्तीति गम्यते। निष्फलस्यानुष्ठानासंभवात्। तथा चापस्तंबः तद्य
थाम्रे फलार्थे निर्मिते छायागंधावनूत्पद्येते। एवं धर्मं चर्यमाणमर्था अनूत्पद्यंते इत्यान

कार्यमित्येव यत्कर्म। नियतं क्रियतेऽर्जुन॥

तद्विचारयति =३

षंगिकफलं नित्यानां दर्शयति अकरणे प्रत्यवायस्मृतिश्च। नित्यानां प्रत्यवायपरिहारं फलं दर्शयति
धर्मेण पापमपनुदतीति। तस्माद्धर्मं परमं वदंति। येनकेनचन यजेतापि वा दर्विहोमेनानुपहतमना
एव भवतीति तदाहुः। देवयाजी श्रेयानात्मयाजी३ इत्यात्मज्ञानयोग्यतारूपगुणोत्पत्तिलक्षणं वा
त्मसंस्कारं नित्यानां कर्मणां फलं दर्शयति तदेवमसंगत्यक्त्वा नान्यत्र श्रेयानीत्यर्थः। यदुक्तं। त्यागसं
न्यासशब्दावेकार्थावुत पदशब्दाविव भिन्नजातीयावर्थाविति तत्र फलाभिसंधिपूर्वककर्मत्याग एव तयोर

याजीति ह ब्रूयात् स कवा आत्मयाजी यो वेदेदं मेऽनेनांगं संस्क्रियत इदं मेऽनेनांगमुपधीयत इत्यादि श्रुतं तत्र ज्ञानप्रतिबन्धक
पापक्षयलक्षणात् कर्मणामंतःकरणं [illegible] ची यते इति यो विदित्वाचरति कर्म स आत्मयाजी देवयज

आत्मयाजीसं देवयाजिनः कामकर्त्तुः श्रेयान्

अंतःकरण शुद्धि फलं =

[illegible]

फलाभिसन्धिपूर्वकं कर्म अत्र फलाभिसन्धिर्विशेषणं कर्म विशेष्यं फलेच्छासत्त्वेपि कर्मणः त्यागः सविशेष्याभावकृतः फलाभिसंधि
विशिष्टस्य कर्मणः त्यागः =१ फलाभिसन्धेर्विशेषणस्य त्यागः =२ फलेच्छाभावो विशेषणाभावः कर्माभावो विशेष्याभाव ३
फलाभिसंधिवि शिष्टकर्म दि उभयाभावः ४

गी॰टी॰ मध्य॰ ७

त्यपि फलाभिसंधौ मोहाद्वा कायक्लेशभयाद्वा यः कर्मत्यागः स विशेष्याभावकृतो विशिष्टाभावस्तामस
त्वेन राजसत्वेन च निरूपितः। यस्तु सत्यपि कर्मणि फलाभिसंधित्यागः स विशेषणाभावकृतो विशि
ष्टाभावः सात्त्विकत्वेन स्तूयत इति। विशेष्याभावकृते विशेषणाभावकृते च विशिष्टाभावत्वस्य स
मानत्वान्न पूर्वापरविरोधः। उभयाभावकृतस्तु निर्गुणत्वान्न त्रिविधमध्ये गणनीय इति चावो

त्यागे=ता मस=

संगं त्यक्त्वा फलं चैव। स त्यागः सात्त्विको मतः। ९॥

चाम। एतेन त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तित इति प्रतिज्ञाय कर्मत्यागलक्षणो हेयविधो दर्शि
यित्वा प्रतिज्ञानन्तरोपेयो कर्मानुष्ठानलक्षणां तृतीयां विधां दर्शयतो भगवतः प्रकटमकौशलमा
पतितं न हि भवति॥ त्रयो ब्राह्मणा भोजयितव्याः द्वौ कठकौण्डिन्यौ तृतीयः द्विविध इति तद्वदिति
पराःस्ते। तिसृणामपि विधानां विशिष्टाभावरूपेण त्यागसामान्येनैकजातीयतया प्राग्व्याख्यात
त्वात्। तस्माद्भगवदकौशलोद्भावनमेवमहृदकौशलमिति द्रष्टव्यं॥ ९॥ श्रीरामाय नमः॥ ७

त्रिविधता रूपा=२

नौ=३

सात्विकस्त्यागस्तादानायसत्वशुद्धिद्वारेणज्ञाननिष्ठाफलमाह। यःत्यागीसात्विकेनत्यागेनयुक्तः सर्वो
क्तेनप्रकारेणकर्तृत्वाभिनिवेशफलाभिसंधिंचत्यक्त्वाश्रेतःकरणशुद्ध्यर्थंविहितकर्मानुष्ठायी। सत्व
दासत्वसमाविष्टःसत्वेनात्मानात्मविवेकज्ञानहेतुनाचित्तगतेनातिशयेनसम्यग्ज्ञानप्रतिबन्धकर
जस्तमोमलराहित्येन। आसमंतात्। फलाव्यभिचारेणाविष्टोव्याप्तोभवति। भगवदर्पितनित्यकर्मानु
ष्ठानात्पापमलापकर्षणात्सत्वगुणेनज्ञानोत्पत्तियोग्यतारूपगुणापगुणाधानलक्षणेनचसंस्कारेणासं
स्कृतमंतःकरणंयदाभवतीत्यर्थः। तदामेधावीशमदमसर्वकर्मपरमगुरूपसदनादिसामग्र्यि
कोगयुक्तेनमननतिदिध्यासनाख्यफलोपकार्यंगयुक्तेनचश्रवणवेदांतवाक्यविचारेणापरेति

नद्वेष्ट्यकुशलंकर्म। कुशलेनानुषज्यते। त्यागीसत्वसमाविष्टो। मेधावीछिन्नसंशयः।१०॥

पत्रेवेदांतमहावाक्यकरणकं। निरस्तसमस्ताप्रामाण्यशंकाकलंकंविद्याविषयकमहंब्रह्मासी
ति-ब्रह्मात्मैक्यज्ञानमेवमेधातयानित्ययुक्तोमेधावीस्थितप्रज्ञोभवतितदाचछिन्नसंशयः अहंब्र
ह्मास्मीतिविद्यारूपयामेधयातदविच्छेदेतत्कार्यसंशयविपर्ययस्तस्यभवति तथाचक्षीणकर्मत्वा

नद्वेष्ट्यकुशलंकर्मअशोभनंकाम्यंनिषिद्धंवाकर्मनप्रतिकूलतयामन्यते कुशलेशोभनेनित्यक

र्मणिनानुषज्जते। नप्रीतिंकरोति कर्तृत्वाद्यभिमानरहितत्वेनकृतकृत्यत्वात्। तथाचश्रुतिः। भिद्यतेहृ
दयग्रंथिश्छिद्यंतेसर्वसंशयाः क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरेइति। यस्मादेवंसात्विकत्या

स्म

द्वियोगैव

स्व

कृत

गी॰टी॰ अ॰ ८

तदेवमात्मज्ञानवतः सर्वकर्मत्यागः संभाव्यते । कर्मप्रवृत्तिहेत्वोः रागद्वेषयोरभावादित्युक्तं । संप्रत्यज्ञ
स्य कर्मत्यागासंभवे हेतुरुच्यते । नहीति मनुष्योऽहं ब्राह्मणोऽहं गृहस्थोऽहमित्याद्यभिमानेनावाधितेन
देहं कर्माधिकारहेतुं वर्णाश्रमादिरूपं कर्तृत्वभोक्तृत्वाद्याश्रयं स्थूलसूक्ष्मशरीरेंद्रियसंघातं विभ
र्ति । अनाद्यविद्यावासनावशाद्व्यवहारयोग्यत्वेन कल्पितमसत्यतयाऽस्वभिन्नमपि स्वाभिन्नतया मपिसम
पश्यन् ॥ धारयति पोषयति चेति देहभृत् । अवाधितकर्माधिकारहेतुदेहाभिमानः तेन विवेक
ज्ञानशून्येन देहभृता कर्मप्रवृत्तिहेतुरागद्वेषयोः फल्पेन सततं कर्मसु प्रवर्तमानेन कर्माण्यशेषा ।

नहि देहभृता शक्यं । त्यक्तुं कर्माण्यशेषतः । यस्तु कर्मफलत्यागी । स त्यागीत्यभिधीयते ॥११॥

षतः । निःशेषेण त्यक्तुं हि यस्मान्न शक्यं न शक्यानि कर्माणि तत्याकारणसामग्र्याः कार्यत्यागस्या
शक्यत्वात् ॥ तस्माद्यस्त्वज्ञोऽधिकारी सत्त्वशुद्ध्यर्थं कर्माणि कुर्वन्नपि भगवदर्पणया तत्फलत्या
गी न शब्दः तस्य दुर्लभत्वद्योतनार्थः स त्यागीत्यभिधीयते गौण्या वृत्त्या स्तुत्यर्थं स त्याग्यपि स
शेषकर्मसन्न्यासस्तु परमार्थदर्शिनैवादेहभृता शक्यते कर्तुमिति स एव मुख्यया वृत्त्या त्यागीत्य

इति हेतोः

शब्दस्य कार्यभूतः संप्रत्ययो बोधः स्मृतो लोकस्य योर्भेदो भवति गौणस्य मुख्यापेक्षा बोधो मुख्यस्य प्रथमो ... स्थितत्वात् तथा च परि
त्यागेऽमावाभावात् इति शब्दस्य यौदाशब्दभावउदाहरणं अग्निः पितृयज्ञः सांग्नीनाममावास्यायाम पुरा ... विहितं श्राद्धं यर

नत्वदेहभृतः परमात्मज्ञानरहितस्य कर्मिणोऽपि कर्मफलाभिसंधित्यागित्वेन गौणसन्न्यासिनः परमात्म
ज्ञानवतो देहाभिमानरहितस्य । सर्वकर्मत्यागिनः मुख्यसन्न्यासिनश्चकः फले विशेषो यदलाभेन गौ
णत्वमेकस्य यल्लाभेन च मुख्यत्वमन्यस्य कर्मफलत्यागित्वेन तुल्येऽपि तल्लाभमित्यनयोर्विशेषो वाच्य इति
अनिष्टमिति अत्यागिनां कर्मफलत्यागित्वेऽपि कर्मानुष्ठायिनामज्ञानां गौणसन्न्यासिनां प्रेत्य विवि
दिषापर्यन्तसन्न्यासमुद्दिश्य प्रागेवमन्तानां सर्वकृतस्य कर्मणः फलं शरीरग्रहणं भवति । इन्द्रजालमाया
मयं प्रत्यगात्मनि यथा सीव फलमत यालयमदर्शनं गच्छतीति निरुक्तेः कर्मणा इति ज्ञात्यभिप्राय
मेकवचनं ॥ एकस्य त्रिविधफलत्वानुपपत्तेः । तच्च फलं कर्मणः त्रिविधत्वात् त्रिविधं पापस्यानि
ष्टं प्रतिकूलवेदनीयं नारकतिर्यगादिलक्षणं पुण्यस्येष्टमनुकूलवेदनीयं देवादिलक्षणं । मिश्र

अनिष्टमिष्टं मिश्रं च । त्रिविधं कर्मणः फलं । भवत्यत्यागिनां प्रेत्य । न तु संन्यासिनां क्वचित् ॥ १२ ॥

सन्तु पापपुण्ययुगलस्य मिश्रमिष्टानिष्टसंयुक्तं मानुष्यलक्षणमित्येवं त्रिविधमित्यनुवादो हृदय
र्थः । एवं गौणसन्न्यासिनां शरीरपातादूर्ध्वं शरीरान्तरग्रहणमावश्यकमित्युक्त्वा मुख्यसन्न्यासि
नां परमात्मसाक्षात्कारेणाविद्यातत्कार्यनिवृत्तौ विदेहकैवल्यमेवेत्याह न तु सन्न्यासिनां क्वचित् प
रमात्मज्ञानवतां मुख्यसन्न्यासिनां परमहंसपरिव्राजकानां प्रेत्य कर्मणः फलं शरीरग्रहणमनिष्ट
मिष्टं मिश्रं च क्वचिद्देशे काले वा न भवतीत्यवधारणार्थस्तुशब्दः ज्ञानेनाज्ञानस्योच्छेदे तत्कार्यभूतानां
कर्मणामुच्छिन्नत्वात् तथा च श्रुतिः भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्मा

कामावास्यापदं समोच्चारणादिति सूत्रार्थः नन्वेवं कथममावास्यायामिति कालसंबंधित्वेन निर्देशो गिनामेव तथा निर्देशा
दिति चेन्न अमावास्याशब्दस्य तत्कालोत्पन्नकर्मणि ... यथा दर्शपूर्णमासयुक्तरणे यश्चविहानमावास्यां

समुदाय इत्यर्थः तथा नात्राय मावास्या पदं तद्विहितकर्मणि वर्तते अंगत्वस्वीकारे फलान्तरं न कल्पनीयमिति पूर्वपक्षे प्राप्ते सिद्धान्तसूत्रं पितृयज्ञः स्वकालत्वादनंगं स्यादिति स्वकालत्वादमावास्याशब्दमुख्यार्थकालसंबन्धित्वादित्यर्थः पश्चिमपाद ... मुख्यार्थ ... पश्चाद्वावि=२
पूर्वा ... पादः १२ चवति

गी॰टी॰ म॰अ॰ १८ पा

षंचसूत्रे । तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादिति यद्यात्मज्ञानादशेषकर्मक्षयं दर्श- शे
यति तेन गौणसंन्यासिनां पुनः संसारः मुख्यसंन्यासिनां तु मोक्ष इति फलविशेष उक्तः अत्र कश्चिदा- मीमांसकः
ह । अनाश्रितः कर्मफलं कार्यं कर्म करोति यः । स संन्यासी चेत्यादौ कर्मफलत्यागिषु संन्यासिशब्द-
प्रयोगात् ॥ कर्मिणामेवात्र फलत्यागसाम्यात् । संन्यासिशब्देन गृह्यन्ते । तेषां च सात्विकानां नित्यक-
र्मानुष्ठानेन निषिद्धकर्माननुष्ठानेन च अपांसंभवान्नानिष्टं फलं संभवति ॥ नापीष्टं । काम्याननुष्ठा-
नात् ईश्वरार्पणेन कर्मफलस्य त्यक्तत्वाच्चात एव मिश्रमपि नेति ॥ त्रिविधकर्मफलासंभवः । अत एवोक्तं ॥ अ-
मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः । नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासयेति तेनेव स्वः श-
ब्दार्थः स च मर्यादा न निरयादिर्भवतीति । तथा हि गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इति शब्द-
मर्यादा यथा अमावस्यायामपराह्णे पिण्डपितृयज्ञेन चरंतीत्यत्रामावस्याशब्दः कालेन मुख्यः त-
त्कालोत्पन्ने कर्मणि च गौणः । यथा य एवं विद्वानमावस्यां । यजत इत्यादौ । तत्रामावस्यायामिति क-
र्मग्रहणे पितृयज्ञस्य तदंगत्वात्र फलं कल्पनीयमिति विधेर्लाघवमिति एवं पठितं कात्यायने-
न । अंगं वा समभिव्याहारादिति गौणार्थस्य मुख्यार्थापेक्षितत्वं कन्वान्मुख्यार्थस्य चेह वाधा-
दमावस्याशब्देन काल एव गृह्यते फलकल्पना गौरवं तत्र कालीनं प्रमाणावत्वादंगीकार्यमिति
सिद्धांतितं जैमिनिनापि पितृयज्ञः स्वकालत्वादनंगं स्यादिति एवं स्थिते संन्यासिशब्दस्य सर्वकर्मत्या-
गिनि शब्दमर्यादया मुख्यत्वात् । कर्मिणि च फलत्यागसाम्येन गौणत्वान्मुख्यार्थस्य चेह वाधाभावात्

अमावस्यानामक कर्मणीत्यर्थः ... शब्दमुख्यार्थग्रहणपश्चाद्वावि=२ मीमांसकः कर्मणामावस्याशब्दः

सिद्धं। तत्त्यागकारणसामग्र्यां कार्यमित्यादश इति चार्थमर्यादा। तथा हि ईश्वरार्पणेनानुष्ठितकर्मफलस्यापि स
त्त्वशुद्ध्यर्थत्वात्त्यागिनः कर्मणामपगतिः स्यात्। अन्तराले म्रियमाणस्य प्रागर्जितैः कर्मभिस्त्रिविधशरीरग्रहणं केन
वार्यते॥ यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण इति श्रुतेः। अन्ततः सत्त्वशुद्धिफलज्ञा
नोत्पत्त्यर्थं तदर्थकाधिकारिशरीरमपि तस्यावश्यकमेव। अत एव विविदिषासंन्यासिनः श्रवणादिकं कुर्व
तः अन्तराले म्रियमाणस्य योगभ्रष्टशब्दवाच्यस्य। शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायत इत्यादिना ज्ञा
नाधिकारिशरीरप्राप्तिरवश्यंभाविनीति निर्णीतं षष्ठेऽध्याये। यत्र सर्वकर्मत्यागिनोऽप्यज्ञस्य शरीर
कर्मिणः ग्रहणमावश्यकं तत्र किं वक्तव्यमज्ञस्यावश्यं शरीरग्रहणमित्यर्थमर्यादया सिद्धं पराक्रान्ते चैकभ
विकपक्षनिराकरणेन सूरिभिः तस्माद्यथोक्तं भगवत्पूज्यपादभाष्यकृतैर्व्याख्यानमेव न्याय्यः। त क
दयमत्र निष्कर्षः अकर्त्रभोक्त्रपरमानन्दाद्वितीयसत्यस्वप्रकाशब्रह्मात्मसाक्षात्कारेण निर्विक
ल्पेन वेदवाक्यजन्येन विचारनिश्चितप्रामाण्येन। सर्वप्रकाराप्रामाण्यशङ्काशून्येन। ब्रह्मात्मज्ञा
ननिवृत्तेनात्कार्यकर्तृत्वाद्यभिमानरहितः परमार्थसंन्यासी सर्वकर्मोच्छेदात् शुद्धः केवलः सन्न
विद्याकर्मादिनिमित्तं पुनः शरीरग्रहणं नानुभवति सर्वभ्रमाणां कारणोच्छेदेनोच्छेदात्। यस्त्ववि
द्यावान्कर्तृत्वाभिमानी देहभृत्स त्रिविधः रागादिदोषप्राबल्यात्। काम्यनिषिद्धादियथेष्टकर्मा
नुष्ठायी मोक्षशास्त्रानधिकारी एकः अपरस्तु यः प्राक्कृतसुकृतवशात्किंचित्क्षीणरागादिदो

वेदने

न्यु

गी॰ टी॰ मस्त्र॰ ९॰

मप्याक्रुवन्निषिद्धानि च काम्यानि च परित्यज्य नित्यनैमित्तिकानि च कर्माणि फलाभिसंधित्यागेन सत्त्वशु-
द्ध्यर्थमनुतिष्ठन् ॥ गौणसंन्यासी मोक्षशास्त्रानधिकारी द्वितीयः । ततो नित्यनैमित्तिककर्मानु-
ष्ठानेनांतःकरणशुद्ध्यात्मनुपजातविविदिषः श्रवणादिना मोक्षसाधनं संपिपादयिषुः । सर्वाणि
कर्माणि विधितः परित्यज्य ब्रह्मनिष्ठं गुरुमुपसर्पति विविदिषासंन्यासिसमाख्यस्तृतीयः तत्रा-
द्यस्य संसारित्वं सर्वप्रसिद्धं । द्वितीयस्य तु अनिष्टमित्यादिना व्याख्यातं । तृतीयस्य तु । अयतिः श्र-
द्धयोपेत इति प्रश्नमनूद्य व्यनिर्णीतं षष्ठे । अज्ञस्य संसारित्वे सिद्धे ध्रुवं कारणसामग्र्याः सत्त्वात्
तत्र कस्यचित् ज्ञानानन्तरं गुणं कस्यचित् ज्ञानानन्तरं गुणामिति विशेषः । विज्ञस्य तु संसारकारणाभावा

पंचैतानि महाबाहो । कारणानि निबोध मे ॥

त्वात् एव कैवल्यमिति द्रष्टौ पदार्थौ स विनाविसिस्मि श्लोके । १३ । तत्रात्मज्ञानरहितस्य संसारित्वे हे-
तुः कर्मत्यागासंभवः इत्युक्तं । न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषत इति । तत्राज्ञस्य कर्मत्या-
गासंभवे को हेतुः कर्म हेतावधिष्ठानादि पंचके तादात्म्याभिमान इति समर्थयितुमेभिः श्लोकैर्द-
र्शयति । तत्र प्रथमेनाधिष्ठानादीनि पंचैव वेदांतप्रमाणसिद्धानि हेयत्वायमवश्यं ज्ञातव्यानीत्या-
ह पञ्चेति । इमानि वक्ष्यमाणानि पंच सर्वकर्मणां सिद्धये निष्पत्तये कारणानि निर्वर्तकानि हे

आत्मज्ञानहीनस्य जन्म आत्मज्ञस्य जन्माभावः=५

सर्वज्ञस्य वचनान्निबोध बोद्धुं सावधानो भव । न ह्यात्मतत्त्वज्ञानात्प्रतीतान्यनवहितचेतसा शक्यंते ज्ञातुमि
ति । चेतःसमाधानविधानेन तानि श्लोकोति । महाबाहुत्वेन च मनुष्येष्वशक्तो ज्ञातुमिति सूचयति
स्तुत्यर्थमेव किमेतानि प्रमाणकान्येव तत्त्ववचनाज्ज्ञेयानीत्यत आह सांख्ये कृतांते प्रोक्तानि निरा
तिशयपुरुषार्थप्राप्त्यर्थं सर्वानर्थनिवृत्त्यर्थं च ज्ञानव्याप्ति जीवब्रह्मणतयोरैक्यं महोपायो ध्येयो गिभ्न
श्रवणादयः पदार्थाः संख्यायंते व्युत्पाद्यंतेऽस्मिन्निति सांख्यं वेदांतशास्त्रं तस्मिन् आत्मव
स्तुमात्रप्रतिपादके किमर्थमनात्मभूतान्येतानि लोकसिद्धानि च कर्मकारणानि पंच प्रतिपाद्यं
त इत्यतः शास्त्रविशेषणं कृतांते इति कृतमिति कर्मोच्यते तस्यांतः परिसमाप्तिर्यत्र तत्त्वज्ञानोत्पत्त्याय

सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥१३॥

त्र तस्मिन् । कृतांते शास्त्रे प्रोक्तानि प्रसिद्धान्येव लोके अनात्मभूतान्येवात्मतया मिथ्याज्ञानारोपेण
गृहीतान्यात्मतत्त्वज्ञानेन वाधसिद्धये हेयत्वेनोक्तानि यदा नान्यथैवमेव कर्मात्मन्यविद्ययाध्यारो
पितमित्युच्यते तदा शुद्धात्मज्ञानेन तद्बाधात्कर्मणोऽन्तः कृतो भवति अतः आत्मनः कर्मासंबंधप्र
तिपादनायानात्मभूतान्येव पंच कर्मकारणानि वेदांतशास्त्रे मायाकल्पितान्यनूदितानीति । ना
ह्येतान्यात्ममात्रतात्पर्यं हीति तेषां तदंगत्वेनैवात्र प्रतिपादनात् । इहापि च सर्वकर्मांतत्वं ज्ञानस्य प्र
तिपादितं सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते इति न स्माज्ज्ञानशास्त्रस्य कर्मांतत्वमुपपन्नं १३

पंचानां प्रतिपादनेन
पञ्चानां कारणानां [illegible] शुद्धैतात्मज्ञानाद् [illegible] नैव [illegible] तेषां प्रतिपादनं तत्स्वात्माद्वैत मेव इत्यर्थः

गी॰टी॰
म॰अ॰
११

प्रमाणान्तराणि कर्मकारणानि पंचात्मनो कर्तृत्वसिद्ध्यर्थं हि यत्नेन ज्ञातव्यानीत्युक्तं कानि तानीत्यपेक्षायां त
त्स्वरूपमाह द्वितीयेन । इच्छाद्वेषसुखदुःखचेतनाद्यभिव्यक्त्याश्रयोऽधिष्ठानं शरीरं तथा कर्ता । यथा ये
ष्ठानमनात्मा भौतिकं मायाकल्पितं स्वप्नगृहस्थादिवत् तथा कर्ता अहंकारोऽनित्यार्थमानवान् ॥ ज्ञानश मि
क्तिप्रधानोऽपंचीकृतपंचमहाभूतकार्योऽहंकारः अन्तःकरणं बुद्धिर्विज्ञानमित्यादिपर्यायशब्दवाच्यः
तादात्म्याध्यासेनात्मनि कर्तृत्वादिधर्माध्यारोपहेतुरनात्मा भौतिको मायाकल्पितश्चेति तथाशब्दार्थः
स्थूलशरीरस्य लोकायतिकैरात्मत्वेन परिगृहीतस्याप्यनात्मत्वं यथेन्द्रियादेरनात्मत्वेन निश्चयात्तद्दृष्टान्तेन
तार्किकादिभिरात्मत्वेन परिगृहीतस्य कर्तुरप्यनात्मत्वनिश्चयः सुकर इत्यर्थः करणं च श्रोत्रादिशब्दाद्युप

अधिष्ठानं तथा कर्ता करणं च पृथग्विधं ॥

लब्धिसाधनं चशब्दः तथेत्यनुकर्षणार्थः पृथग्विधं नानाप्रकारं पंच ज्ञानेन्द्रियाणि पंच कर्मेन्द्रियाणि म
नो बुद्धिश्चेति द्वादशसंख्यं करणवर्गं मनो बुद्धिश्चेति वृत्तिविशेषौ वृत्तिमानहंकारः । कर्तैव चिदाभा
ना सत्वसर्वज्ञे वा विशिष्टः विविधा नानाप्रकाराः पंच यादशधा वा प्रसिद्धाः । चशब्दः तथेत्यनुकर्षणार्थः पृ
थगसंकीर्णाः । चेष्टाः क्रियारूपाः क्रियाशक्तिप्रधानापंचीकृतपंचमहाभूतकार्याः । क्रियाप्रा श्र
धान्येन वायवीयत्वेन व्यपदिश्यमानाः । प्राणापानव्यानोदानसमानाः नागकूर्मकृकरदेवदत्तधनं
जयाख्याश्च तदंतर्भूता एव वा चशब्दः प्रावृत्तः करणस्य कर्तुर्लयेऽपि प्राणव्यापारदर्शनाद्भेदव्यपदे ११
शाच्चान्तःकरणादत्यन्तभिन्ना एव प्राणा इति केचित् ॥ क्रियाशक्तिज्ञानशक्तिमदेकमेव ॥ ॥ ॥

जीवत्वोपाधिभूतमयं चीकृतपंचमहाभूतकार्यं क्रियाशक्तिप्राधान्येन प्राण इति । ज्ञानशक्तिप्राधान्येन
चांतःकरणमिति व्यपदिश्यत इत्यभियुक्ताः । स ईक्षांचक्रे कस्मिन्नहमुत्क्रांत उत्क्रांतो भविष्यामि कस्मि
न्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजतेति श्रुतावुत्क्रांतिगत्याद्युपाधित्वं प्राणस्योक्तं तथा स धु
धीः स्वप्नो भूत्वेमं लोकमन्ववक्रामति बुद्धेरुक्तं च तत्रोपाधिभेदे च जीवभेदप्रसंगः । तस्माद्बुद्धिप्राण
योरेकत्वेनैवोत्क्रांत्याद्युपाधित्वमुक्तं भेदव्यपदेशस्तु शक्तिभेदात्तस्य प्रोक्तं च ज्ञानशक्तिर्मंगलयेपि क्रि
याशक्तिभागदर्शनमेकत्वेपि न विरुद्धमनुभवसिद्धत्वात् । दृष्टिसृष्टिलये सर्वलयेपि प्राणव्यापा आवहारि कस्य चियते दृष्टिसृष्टिलयेपि=
ये रवच्छरीरस्य तत्स्थप्रोक्तमित्येवं देशायैः कल्पितत्वाच्च तस्माद्भयथापि व्यपदेशाभेद उपपन्नः । देवं
चानुग्राहकदेवताजातं । चशब्दस्तथेत्यनुकर्षणार्थः । अत्र कारणवर्गे पंचमे पंचसंख्याश्रवणा । प

विविधाश्च पृथक्चेष्टा । दैवं चैवात्र पंचमं ॥२४॥

र्वशब्दस्तथाशब्देन संवध्यमानः अनात्मभौतिकत्वकल्पितत्वाद्यवधारणार्थः । पंचानामपि तत्र शरी
रस्य कर्तृकरणक्रियाधिष्ठानस्य देवता पृथिवी यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्रा
णः चक्षुरादित्यं दिशः श्रोत्रं मनश्चंद्रं पृथिवीं शरीरमिति श्रुतौ वागाद्यधिष्ठानत्वादिभिः सह शरी
ग राधिष्ठानत्वेन पाठात् । कर्तुरहंकारस्याधिष्ठात्री देवता रुद्रः पुराणादिप्रसिद्धः । करणानां चाधिष्ठा
त्र्यो देवताः प्रसिद्धाः श्रोत्रत्वक्चक्षूरसनघ्राणानां दिग्वातार्कप्रचेतोश्विनः वाक्पाणिपादपायूपस्थानां
वह्नीन्द्रोपेन्द्रमित्रप्रजापतयः । मनोबुद्ध्योश्चंद्रबृहस्पती इति पंच प्राणानां क्रियाव्यापाराः । सद्योजात

वामदेवाद्यैरनुरुद्धेष्टानां । भावद्दैवमादित्यादि चक्षुरादीनां ग्राहकमित्यधिष्ठानादिदेवतानामप्युपलक्ष
णं ॥ १४ ॥ स्वरूपमुक्तानि तेषां पंचानां कर्महेतुत्वमाहरतीयेन । शारीरं वाचिकं मानसिकं विधिप्रतिषेधल
गी॰टी॰ क्षणं त्रिविधं कर्म धर्मशास्त्रेषु प्रसिद्धं अत्र पादेनचोक्तं ॥ अत्र त्रिवर्गबुद्धिशारीरादि भवति बुद्धिर्मनः
सप्त॰ स्वतः प्राधान्याभिप्रायेणोच्यते ॥ शरीरेण वाचा मनसा वा यत्कर्म प्रारभते निर्वर्तयति नरः मनुष्या
१२ धिकारत्वात् ॥ शास्त्रस्य कीदृशं कर्म न्याय्यं वा शास्त्रीयं धर्मं विपरीतं वा अशास्त्रीयमधर्मं यच्चनि
मिषितचेष्टितादि जीवनहेतुरप्यद्वा विहितप्रतिषिद्धसमं तदपि पूर्वकृतधर्माधर्मयोरेव कार्यमे

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः । न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः १५ ॥
तत्रैवं सति कर्तारमात्मानं केवलं तु यः । पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः १६ ॥ १५

न्याय्यविपरीतयोरेवांतर्भूतं पंचैते यथोक्ता अधिष्ठानादयः तस्य सर्वस्यैव कर्मणो हेतवः कारणा
नि ॥ १५ ॥ इदानीमेतेषामेव कर्मकर्तृत्वादात्मनो न कर्तृत्वमित्यधिष्ठानादिनिरूपणाफलमाह त
त्र कर्मणि प्रागुक्ते सर्वस्मिन् । एवं सत्यधिष्ठानादिपंचहेतुत्वे सति तैर्निर्वर्त्यमाने आत्मानं सर्वज्ञ के
उप्रपंचस्य भासकं तत्त्वास्फूर्तिरूपं प्रकाशपरमानंदमवाच्यं केवलमसंगोदासीनमकर्तार
मविक्रियमद्वितीयं तु एव । परमार्थतः अविद्यया तु अधिष्ठानादौ प्रतिबिंबितमादित्यमिव
तोयेतज्ञात्मकमनन्यत्वेन परिकल्प्य तोयचलनेनादित्यं चलतीति ॥ ॥ श्रीरामचंद्राय नमः १२

वदधिष्ठानादिकर्मणो हेतुमेव कर्तेति साक्षिणामपि संतं कर्तारं क्रियाश्रयं यः पश्यत्यविद्ययाकल्प
यति रज्जुमिव भुजंगं स एवं पश्यन्नपि न पश्यत्यात्मानं तत्त्वेन स्वरूपाज्ञानकृतत्वादध्यासस्य सम्भ्रान्त्या
विपरीतमेव पश्यति। न तत्त्वानत्त्वमित्यत्र को हेतुरित्यत आह अकृतबुद्धित्वात्। शास्त्राचार्योपदेशन्या
यैरनुपजनितविवेकबुद्धित्वात् न हि रज्ज्वां तत्त्वसाक्षात्काराभावे भुजंगभ्रमः कश्चन वाध्यते एवं
शास्त्राचार्योपदेशन्यायैः परिनिश्चितेऽहं ममेति सत्यं ज्ञानमनन्तमकर्तृ भोक्तृ परमानंदघनमना
द्यमद्वयं ब्रह्मेति साक्षात्कारेऽनुपजनिते कुतो मिथ्याज्ञानतत्कार्यबाधः एतादृशं साक्षात्का
रमेव गुरूपसत्त्या वेदान्तवाक्यविचारेणाकृतो न जनयतीत्यत आह। दुर्मतिरिति दुष्टाविवेकप्र
तिबंधकपापेन मलिना मतिर्यस्य सः। अतोऽशुद्धबुद्धित्वान्नित्यानित्यवस्तुविवेकादिशून्यत्वेन त
त्त्वज्ञानायोग्यत्वादकर्तारमपि कर्तारं केवलमप्यकेवलमात्मानमविद्ययाकल्पयन् संसारी कर्मा
धिकारी देहभेदकृतबुद्धिः कर्मकर्तृत्वतादात्म्याभिमानात्कर्मत्यागासमर्थः। सर्वदा जननम
रणप्रवहे नैरनिष्टमिश्रं च कर्मफलमनुभवति। एतेन यत्लौकिको देहादिव्यतिरिक्तमात्मानमे
व कर्तारं केवलं पश्यति। सोऽप्यकृतबुद्धित्वेन व्याख्यातः अन्यस्त्वाह आत्मा केवलो न कर्ता। किन्तु
अधिष्ठानादिभिः संहतत्वादुपपन्नः। जलसूर्यकादिवद्वाविषयकेन संहतत्वेन कर्तृत्वमपिना
स्त्येवाधिष्ठानादीनामप्यविदितकत्वाच्च। केवलशब्दस्तु स्वभावसिद्धमात्मनोऽसंगत्वं गृहीतोयं रूप

नाग्रदाद्य वस्यारचिते

संहतत्वान्नन्यथेति तः कर्तैव कर्तारमात्मानं केवलं पश्यन्नु मतिरिति केवलशब्दप्रयोगादिति तत्र परमार्थतः सर्वक्रियाशू
न्यस्यासङ्गस्यात्मनोऽधिष्ठानादिभिः ४२ ...

गीटी॰ मञ्ज॰ २२

तदेवं चतुर्भिः श्लोकैः अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलं । भवत्यत्यागिनां प्रेत्येति च रणत्रयं व्याख्या
तं इदानीं न तु संन्यासिनां क्वचिदिति चतुर्थं चरणमेकेन व्याचष्टे ॥ यस्य पूर्वोक्तविधशीलस्य गुरोः कर्मभिः
क्षपितेषु विवेकविरोधिषु पापेषु नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयं प्राप्तवतः शास्त्राचार्योप
देशन्यायजनिताकर्त्रभोक्तृस्वप्रकाशपरमानंदाद्वितीयब्रह्मात्मसाक्षात्कारस्याज्ञाने सकार्ये बाधिते
न भवत्यहंकृतोऽहंकर्तेत्येवंरूपो भावः प्रत्ययो यस्य भावः सद्भावः अहंकृतोऽहमिति व्यपदेशो हीन ।
अहंकारबाधेन शुद्धस्वरूपमात्रपरिशेषादिति वा अहंकृतः अहंकारस्याभावः तन्नादात्म्यं यस्य त
विवेकेन बाधितत्वादिति बाधितानुवृत्तावपि । एतदेव पंचाधिष्ठानादयो मायया मय्यसर्वात्मन्विक
ल्पिताः ॥ सर्वकर्मणां कर्तारो मया स्वप्रकाशचैतन्येनासंगेनकल्पितमेवं येन प्रकाशमाना अहेतु

यस्य नाहंकृतो भावो । बुद्धिर्यस्य न लिप्यते । हत्वापि स इमांल्लोकान्न हंति न निबध्यते ॥ १७ ॥

न कर्त्ता किंतु कर्तृतद्व्यापाराणां साक्षिभूतः क्रियाज्ञानशक्तिमदुपाधिरहितः अतिशुद्धः सर्वकार्य
कारणासंबंधरहितः कूटस्थनित्यो निर्द्वयः । सर्वविकारशून्यः । असंगो ह्ययं पुरुषः साक्षी चेता केवलो
निर्गुणश्च अप्राणो ह्यमनाः शुभ्रो अक्षरात्परतः परः अजआत्मा महान्ध्रुवः सलिल एको द्रष्टा
अद्वैतः अजो नित्यः शाश्वतोऽयं पुराणो निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनमित्यादिश्रुतिभ्यः ।
अविकार्योऽयमुच्यते प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः अहंकारविमूढात्मा कर्ताहमिति
मन्यते तत्त्ववित्तु न सज्जते । शरीरस्थोऽपि कौंतेय न करोति न लिप्यते इत्यादि स्मृतिभ्यश्च । तस्मान्नाहंकृ [illegible] २२

घं

मृ

कृ

स्यनलिप्यतेनानुशयिनीभवति इदमहमकार्षमेतत्फलंभोक्ष्यइत्यनुसंधानंकर्तृत्वाभिमाननिमित्तंलेपोनुश
यः सचपुण्यकर्मणोःहर्षरूपःपापेपश्चात्तापरूपः ईश्वरशोधनविधिनापिलेपेनबुद्धिर्नयुज्यतेकर्तृत्वाभिमान
वाभावात् तथाचश्रुतिःप्रत्यंतिः एवमुहैवेनेननतरतइत्यतः पापमकरवमित्यतःकल्याणमकरवमित्युभे
उहैवैषएतेभवति नैनंकृताकृतेतपतः तदेतदृचाभ्युक्तं एषनित्योमहिमाब्राह्मणस्य नवर्धतेकर्मणा
नोकनीयान् तदेवस्यात्पदवित्तंविदित्वा नलिप्यतेकर्मणापापकेनेति पापकेनेतिपुण्यस्याप्युपलक्षणा
म् वर्धतेकनीयानितिचपुण्यपापयोःपरितोषपरितापाभिप्रायं यस्यनाहंकृतोभावोबुद्धिर्यस्यनलिप्य
ते सर्वोक्तकर्मतिविलक्षणःसमतिःपरमार्थदर्शीपश्यन्नकर्तारमात्मानंकेवलंसकर्तृत्वाभिमाना
भावादनिष्टादित्रिविधकर्मफलभागीनभवतीत्येतावतिशास्त्रार्थे अहंकाराभावबुद्धिलेपाभावौस्तो
तुमाह हत्वेति हत्वापिहिंसित्वापि सइमांल्लोकान्सर्वान्प्राणिनःनहंतिहननक्रियायाःकर्त्तानभवति
अकर्तृस्वरूपसाक्षात्कारात् ननिबध्यते नापितत्कार्येणाधर्मफलेनसंबध्यते अत्रनाहंकृतोभाव
इत्यस्यफलंनहंतीति बुद्धिर्नलिप्यतइत्यस्यफलं ननिबध्यतइति अनेनचकर्मालेपप्रदर्शनेस्तु
तिमात्रमुक्तं नतुसर्वप्राणिहननंसंभवति हत्वापीति कर्तृत्वाभ्युपगमवादेपिनकर्तृत्वदृष्ट्यालौ
किकवानहंतीतिकर्तृत्वनिषेधः शास्त्रीयथापरमार्थदृष्ट्येतिनविरोधःशास्त्रादेः नायंहंतिनहन्य
तइतिसर्वकर्मासंस्पर्शित्वमात्मनः प्रतिज्ञायनजायतइत्यादिहेतुवचनेनसाधयित्वा वेदाविनाशि
नमित्यादिना विदुषःसर्वकर्माधिकारनिवृत्तिःसंक्षेपेणोक्ता मध्येचतेनतेनप्रसंगेनप्रपञ्चितेह
शास्त्रार्थंतावत्प्रदर्शनायोपसंहृतावचनहंतिननिबध्यतइति ॥१७॥ श्रीरामचंद्रायनमोनमः॥

गी०टी० मस्र० १८

एवं चाविद्याकल्पितानामधिष्ठानादीनामात्मकृतानां सर्वेषामपि कर्मणामात्मविषयासम्बद्धे दोपपत्तेः परमा
र्थसंन्यासिनामनिष्टादि त्रिविधं कर्मफलं न भवतीत्युपपन्नं परमार्थसंन्यासश्चाकर्त्रात्मसाक्षात्कार एव ज
नकादीनामेतादृशसंन्यासित्वेपि बलवत्प्रारब्धकर्मवशाद्बाधितानुवृत्त्या परपरिकल्पनया वाकर्मदर्श
नेन विरुद्धं परमहंसादीनामीदृशानां भिक्षाटनादिवत् । अत एव ज्ञानफलभूतो विद्वत्संन्यास उच्यते सा
धनभूतस्तु विविदिषासंन्यासः अनेवंविधोपि प्रथममनन्तरकाले ज्ञानोत्पत्तावेवंविधो भवतीति पूर्वम
धिष्ठानादिपञ्चकस्य क्रियाहेतुत्वेनात्मनः सर्वकर्मासंस्पर्शित्वमुक्तं संप्रति तमेवार्थं ज्ञानं ज्ञेयादि प्रक्रि
यारचनया त्रैगुण्यभेदव्याख्यया च विवरीतुमुपक्रमते ज्ञानं विषयप्रकाशशक्तिया ज्ञेयेतस्य कर्मप्रवि
ज्ञानानन्तराश्रयो भोक्तातः । करणोपाधिपरिकल्पितः एतेषां त्रयाणां सन्निपाते हि हानोपादानादि प्र

ज्ञानं ज्ञेयं परिज्ञाता । त्रिविधा कर्मचोदना । करणं कर्म कर्तेति । त्रिविधः कर्मसंग्रहः । १८ ॥

योजनः सर्वकर्मारम्भः स्यात् अत एतत्त्रयं सर्वेषां कर्मणां प्रवर्तकं । तदेतदाह । त्रिविधा कर्मचोदने
ति चोदनेति प्रवर्तकमुच्यते । चोदनेति क्रियायाः प्रवर्तकं वचनमाहुरिति । शावरे चोदना चोपदे
शश्च विधिश्चैकार्थवाचिन इति भाट्टैश्च वचने क्रियाप्रवर्तकवचनत्वे पर्यपि चोदनापदशक्तता
या प्रतीयते । तथापि वचनत्वं विहाय प्रवर्तकमात्रमिह लक्ष्यते । ज्ञानादिषु वचनत्वाभावादेवं
प्रेरणीयत्वे प्रेरकत्वं चानात्मन एव नात्मन इत्यभिप्रायः तथा करणं साधकतमं वाह्यं श्रोत्रादि अन्तः
स्थं बुद्ध्यादि । कर्म कर्तुरीप्सिततमं क्रियया व्याप्यमानमुत्पाद्यं आप्यं संस्कार्यं कर्ता च इतरकारका

वटादि ग्रामादि दर्पणादि
विकार्यम्
उत्पाद्यादि

चकाराथादिति शब्दात्संप्रदानमपादानमधिकरणं चराशित्रयालम्भनं एवं कारकषट्कमेव त्रिविधक्रियायाश्रयोऽनन्तरुक्तः स्याच्च

वैदिकलिङादिशब्दप्रेरणीया ... लिङादिशब्दविषयकं = ५ मात्रत्यर्थः

योक्ता क्रिया निर्वर्तकः चिदचिद्रूपिण्यस्तीति त्रिविधस्त्रिप्रकारः कर्मसंगृह्यते तमेवेत्यत्रेति कर्मसंग्रहः कर्मा
श्रयः चकारात्सम्प्रदानमपादानमप्यादानमधिकरणं चरशित्रयालम्भनं एवं कारकषट्कमेव त्रिविधं क्रिया
याश्रयोऽनन्तरुक्तः स्यात् इत्यर्थः कर्म प्रेरकस्य कर्माश्रयस्य च कारकरूपत्वात् त्रैगुण्यात्मकत्वाच्च प्रकार
कत्वभावो गुणातीतस्यात्मा सर्वकर्मासंस्पर्शीत्यभिप्रायः अथवा ज्ञाने प्रेरणात्रूपे लिङादिशब्दजन्यं
ज्ञेयं तस्य ज्ञानस्य विषयत्वेन लिङादिशब्दस्वरूपं प्रेरकं परिज्ञाता तस्य ज्ञानस्याश्रयः प्रेरणीयस्त्वेवं त्रिविधा
कर्मचोदना कर्म क्रियापुरुषव्यापाररूपार्थीभावना तद्विषयाचोदना प्रेरणा विधिरूपा शाब्दीभावनेत्यर्थः
तथा करणं साधनमिति कर्तव्यता कं साधनं धात्वर्थः कर्मभाव्यं स्वर्गादिफलं कर्ता फलकामनावान् पुरुषः क्रिया
यानिर्वर्तक इत्येवं त्रिविधः कर्मसंग्रहः कर्मणः पुंव्यापाररूपाया भावनायाः संग्रहः संक्षेपः तदेवमर्थभाव
नारूपं पुंप्रयत्नस्य विधेर्यस्याभावात् शाब्दभावनारूपो विधिर्न सुहृन्मात्मनो गोचरयति । कारकाश्रयत्वाद्वि
धिविधेर्ययोः । तदुक्तं । त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुनेति कारकाणां चैव त्रैगुण्यरूपत्वमनन्तर
मेव व्याख्यास्यत इत्यभिप्रायः । अत्र प्रसंगाद्विधिश्चिन्त्यते । प्रवृत्तिहेतुत्वेन प्रेरणा तावत्सर्वलोकानुभव
सिद्धा । राज्ञा प्रेरितो बालेन प्रेरितो ब्राह्मणेन प्रेरितोऽहमिति हि प्रवर्तनाव्यवहारो भवति सा च प्रवर्तना प्रवर्त
कराज्ञादित्रिष्ठा तत्रोत्कृष्टस्य निकृष्टं प्रति प्रवर्तना आज्ञा प्रेषणा इति चोच्यते । निकृष्टस्योत्कृष्टं प्रति प्र
वर्तना याच्ञा प्रेषणा इति चोच्यते । समस्य समं प्रत्युत्कर्षनिकर्षोदासीन्येन प्रवर्तनानुज्ञा अनुमतिरि
ति चोच्यते तेषां चाज्ञायाः ज्ञानविशेषाविशेषावाचनेन धर्मा एव लोके प्रसिद्धाः वेदेऽपि विधिनाहं प्रेरितः क
रोमीति व्यवहारो भवति । तत्र स्वयमेवाचेतनत्वादपौरुषेयत्वाच्च वैदिकस्य विधेर्न चेतनधर्माज्ञा

रेका =२

स्य पुरुषप्रवृत्तिरूपभावनाज्ञानहेतुश्रीपारस्याद्वाचकशक्तिमत्तया विधिशब्दज्ञानं स एव च तस्य प्रवृत्तिहेतुश्रीपार इति पूर्ववर्तिनाभिधीयते ... लभ्यते
त्वात् ... पुरुषप्रवृत्तिजनकज्ञान ... ज्ञानजनकश्रीपारातिरिक्तश्रीपारकल्पनेमानाभावात् ... ज्ञानजनकत्वश्रीपारस्य विधिशब्दस्य ज्ञानं शक्तिज्ञानं
पुरुष ... विशिष्ट ... ज्ञानेन ... तयोरन्यतरस्य शब्द भावना ... = ५

गीटी॰ मञ्॰ १५

त्वयमेमेणैव सामुपगतवागत्यन्तासंभवात् । तएवं च यमेश्रोदना प्रवर्तनाप्रेरणाविधिरूपदेशः शाब्दभावनेति
चोच्यते तत्र केचिद लौकिकमेव शाब्दव्यापारं कल्पयंति अन्ये तु लिङ्मैनैवायपत्तेनालौकिककल्पनासहत्वेनप्र
वर्तनाम्हि प्रवृत्तिहेतुर्व्यापारः । विधिशाब्दस्य चाख्यातत्वेन दशलकारसाधारणेनोपाधिनापुरुषप्रवृत्तिरू
पार्थभावनावाचकत्वं लिङः न च तज्ज्ञानहेतुत्वमिति यावत् सा च ज्ञातापवान् ष्टानुशकानरति नहीहे
तोरपिशाब्दस्यानेहेतुत्वं परंपरयाभवत्येव । तत्र विधिशाब्द विधिशब्दं करणमिति विवेकः । एवं स्थिते नेति
ष्कर्षः विधिनाम् ज्ञानं जन्यते प्रवर्तनात्वेनाभिधीयते यो ति विधिज्ञानमेव शाब्दभावना । तस्यां च पुरुषप्रवृ
त्तिरूपार्थभावनैव भाव्यतयान्वेति । करणतया च प्रवृत्तिवाचकशक्तिमद्विधिः भावनासाध्यस्यापि फलाव
च्छिन्नां भावनां प्रति करणत्वं फलकरणत्वादेव यागस्येव स्वर्गभावनां प्रति न विरुध्यते । तथा च पुरुषः
स्वप्रवृत्तिं भावयेत् केनेत्यपेक्षायां पुरुषप्रवृत्तिवाचकशक्तिमत्तया ज्ञातेन विधिशब्देनेति करणांशपू
रणं कथमित्याकांक्षायामर्थवादैः स्तुत्येति कर्तव्यतांशपूरणं यथा गोः क्रय्यति लौकिके वियोव क्र
द्वी राजीवहत्सास्त्र पत्या समोसमीनेत्यादि लौकिकार्थवादवत् ॥ ननु आख्यातत्वेन विधिशाब्दाद् उपस्थि
तापुरुषप्रवृत्तिर्भाव्यतयान्वेतु करणं तु कथमनुपस्थितमन्वेति । उच्यते । विधिशब्दस्तावत् श्राव
णेनोपस्थापितः तस्य पुरुषप्रवृत्तिवाचकशक्तिरपि स्मरणेनोपस्थापिता तदुभयवैशिष्ट्यं तत्त्विष्टता
ज्ञानेन च मनसेति वाचकशक्तिमत्तया ज्ञातो विधिशब्दः उपस्थित एव । अनेन नयेन शक्त्या यत्नं भावयेदिति
प्रतिशाब्दस्तावत् ध्याय विधितात्पर्यानशब्दातिरिक्तेनोपस्थितमपि शाब्दबोधे भासत एव यथाज्योतिष्टो १५

तत्राधीभावनायाम् = ५ पुंप्रवृत्तिज्ञानेनैतोरपि प्रवृत्तिः = ... त्व = ५ शाब्दभावना = शाब्दीभावना पुंप्रवृत्तिवाचकतया ज्ञातेन विधिशब्देन ... बोधकोऽर्थवादैः ... [illegible]

पुंप्रवृत्तिज्ञानेन = ४ पुंप्रवृत्ति = ५ ज्ञानमेव = ६

रपि स्मरणेनोपस्थापितानउभयवैशिष्ट्यं तत्त्विष्टताज्ञानेन च मनसेति वाचकशक्ति = ४ विधिशब्दः पुंप्रवृत्तिवाचकशक्तिमान् इति मानसबोधाधारं विधिशब्द
... तिवाचकशक्तिमत्तयास्याज्ञानं ... करणशक्ति ... ज्ञानम् ... पुंप्रवृत्तिभाविका ... विधिशब्द करणिका ... ज्ञानेनेति
... लिङः शाब्दनिष्ठा भावनेति शाब्दबोधे लिङ उपस्थितोऽपि लिङ शाब्दीभासते = ७

मादिनामधेयं। यथा वा लिंगविनियोज्यो मंत्रः तद्वत्क्रमाचार्थैकस्मिन्नधिकरणोऽन्वयस्थितविशेषणादि वि
शिष्टबुद्धिर्न भवति। न चैतद्भिन्नविशेषणोऽस्ति एवमर्थवादानामुपस्थितिः श्रोत्रेण। प्राशस्त्यसन्नतेरेव।
लक्षणया यातद्भयपि निष्ठज्ञानतायास्तु मननेऽर्थवादैः प्रशस्तत्वेन ज्ञानेनेतिकर्तव्यतांशान्वयोपपद्य
त एव। ननु किं प्राशस्त्यज्ञानतास्य फलसाधनत्वे। तस्य योगेन भावयेत्स्वर्गमित्यर्थभावनान्वयवशेन वि
धिवाक्यादेव लब्धत्वात्। नान्यथानुपपन्नावन्वययोगात्। उच्यते। बलवदनिष्टाननुबंधित्वं प्राशस्त्यं तच्चानि
ष्टहेतुत्वज्ञानाल्लभ्यते। इष्टहेतावपि कलंजभक्षणादावनिष्टहेतुत्वस्यापि दर्शनात्। विहितश्ये
नफलस्य च शत्रुवधस्यानिष्टानुबंधित्वे दृष्टे अतो यावत्साधनस्य फलस्य चानिष्टहेतुत्वं नोच्यते ताव
दिष्टहेतुत्वे ज्ञातेऽपि न तत्र पुरुषो न प्रवर्तते। तदेवोक्तं। फलतोऽपि च यत्कर्म नानर्थेनानुबध्यते। केवल
प्रीतिहेतुत्वात्तद्धर्म इति कथ्यते इति। अतः स्वतः फलतो वानर्थाननुबंधित्वरूपप्राशस्त्यबोधनेनार्थ
वादा विध्युपकारिणो भवंति। कदर्थभः स्वतः फलतो वानर्थाननुबंधित्वशंकायाः प्रवृत्तिप्रतिबंधिकाया
विगमः। इदमेव विधेः प्रवृत्तिजनने साहाय्यमर्थवादैः क्रियत इति विधिरर्थवादसाकांक्षः एवमर्थ
वादा अपि अभिययागोमापावाहत्याभूतमर्थं वदंतोऽपि स्वाध्यायविध्यापादितप्रयोजनवत्त्वलाभा
य विधिसाकांक्षाः सोऽयं नष्टाश्वदग्धरथवत्संप्रयोगः यथैकस्य दग्धस्य रथस्याश्वजीवद्भिरश्वैर्नष्टस्य वि
द्यमानरथस्याविद्यमानाश्वस्य संप्रयोगः परस्परस्यार्थवत्त्वार्थं तथार्थवादानां प्रयोजनांशे विधिनाऽ

प्रतिष्ठाकामारात्रिसत्रं॰ इति अर्थवादविधिवाक्ययोः=१ यं तकालदेवतोद्देशपर्कं कपिंजलानालभेत श्रुत्यास्त्र मित्यर्थवादांशः=२
विध्यंशः=३

शेऽर्थवादे विनितदीक्ष्यामनुभयोः श्रवणे पूर्णमेव वाक्यमेकसत्रवर्णत्वन्यस्य कल्पनयाप्यरणीयं यथावसं देवतायै
तायकपिंजलानालभेत इति विधाः व र्थवादांशो श्रुतोपि कल्प्यते प्रतितिष्ठंतिह्वा य एता रात्रीरुपयंतीत्या
गीटी॰ घर्थवादे विध्यंशः। तथा च सूत्रं॥ विधिनात्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युरिति विधिनात्वेतिस्मा
मश्र॰ कांक्षेण प्रयोजनमाकांक्षाणामर्थवादानामेकवाक्यत्वाद्धि धीनां विधेयानां स्तुत्यर्थेन स्तुतिप्रयोज
१६ नेन स्तुतिरूपेण लाक्षणिकेनार्थेन चानर्थक्याभावादर्थवादा धर्मे प्रामाण्यं निस्युरिति तात्पर्यार्थः न
नु यथैव लौकिकाः शब्दाः तथैव वैदिकास्तथैव चामीषामर्थ इति न्यायाद्धि विधिशब्दस्य लोके यत्र शक्ति
र्गृहीता वेदेपि। तदर्थकेनैव तेन भवितव्यं॥ लोके च प्रेषणादिपुरुषधर्ममेवाभिव्यक्तमिति वेदेश
ब्दभावना वाच्यत्वं कथमुपपद्यते। उच्यते। लोकवेदयोरेकरूपमेव तथाहि लोके प्रेषणादिकं न ते
नते नरूपेण विधिपदवाच्यमननुगमेन नानार्थत्वप्रसंगात् इह देवभावनावाच्यत्वोपपत्तेश्च किं त
प्रेषणाध्येषणानुज्ञासु सर्वत्र प्रवर्तनात्वमेकं तच्च शाब्दव्यापाररूपि तु ल्यमिति तदेव लिङादिपदवाच्या
जा तं च लौकिकशब्देनाप्येव। नत्र राजादीनामेव प्रवर्तकत्वात्। प्रवर्तकव्यापार एव हि प्रवर्तना प्रवर्त
कत्वं च राजादेरेव वेदस्याप्यनुभवसिद्धं। ननु वेदेपि प्रवर्तनावानीश्वरः कल्प्यतां लोके राजादिवत्
तदुक्तं विधिरेव तावद्गर्भ इव श्रुति कुमार्याः पुंयोगमानमिति न वेदस्यापौरुषेयत्वात् नहि वेदस्य क
र्ता पुरुषो लोके वेदे वा प्रसिद्धः। न तत्कल्पने च तज्ज्ञान प्रामाण्यापेक्षया वेदप्रामाण्यपि निरपेक्षत्वेन स्थि
तं स्यात् ततः प्रामाण्यभंगः स्यात् बुद्धवाक्येपि प्रामाण्यप्रसंगाच्च ईश्वरवचनत्वे समानेपि बुद्धवाक्यं न प्रमा॰ १६

पुरुषपरिज्ञान=२

नतु महाजनपरिगृहीतत्वाद्वेदवाक्यं प्रमाणं तदगृहीतत्वाद्बुद्धवाक्यमप्रमाणं ... मत्या ... कथाह महाजनानामिति =(

त्वकन्यायप्रसंगः । महाजनानामुभयसिद्धत्वाभावेन तत्परिग्रहापरिग्रहाभ्यामपि विशेषानुपपत्तेः ईश्व
रप्रेरणाया लोकवेदसाधारणत्वेन लोकेपि राजादीनां तत्परिग्रहे प्रेरकत्वेन स्यात् ईश्वरप्रेरणायां स्थितायां
मेव राजादिरप्यसाधारणतया प्रेरक इति चेत् ॥ हन्त सति ... नवा किन्तु ह्यप्यसाधारणः प्रेरको वेदः ।
एव राजादिस्थानीय इत्यागतं मार्गे ईश्वरप्रेरणायाः साधारणाया असाधारणप्रेरणासहकारेणो
व प्रवर्तकत्वात् ॥ किंच ईश्वरप्रेरणायां सर्वोपि विहितं कुर्यात् न तु कश्चिदपि लंघयेत् ॥ निषिद्धे ।
पि चेश्वरप्रेरणास्त्येवान्यथा न कोपि तत्र प्रवर्तेतेति तदपि विहितं स्यात् । तथा चोक्तं । अज्ञो जन्तुरनी
शोयमात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा । तस्माद्राजादिरिव वेदोपि
स्वप्रवर्तितान् ज्ञापयन्ति क्षीयहारन्तरेण न प्रवर्तयतीति सिद्धं लोकवेदयोरैकरूप्यं । एवं मीमांस ।
कानां स्वतंत्रो वेदो ब्रह्ममीमांसकानां तु ब्रह्मविवर्तस्तत्परतंत्रो वेद इति यद्यपि विशेषस्तथापि ।
तिः स्वर्गसिद्धान्तत्वेन वेदस्यापौरुषेयत्वमुभयेषामपि समाने ॥ अत्र च प्रवृत्त्यनुकूलव्यापारत्वे
प्रवर्तनात्वे सुखदुःखवोपाधिसिद्धविधिपदशक्तेपि । तदाश्रयविशेषोपस्थितिर्गवादिवत्ता ।
ल्येवानुकूलव्यापारत्वे वा शक्तं ॥ प्रवृत्त्युद्देश्यत्वाख्यानत्वेन शक्त्यन्तरलभ्य एव दंडीत्यत्र संबंधिति
मत्वर्थे प्रकृत्यर्थदंडांशवत् । फलसाधनत्वोनोपपत्तेव प्रेरणानामेव कुर्वन् प्रेरको विधिरतः फल
साधनतेव प्रेरणात्वेन विधिपदशक्येति मंडनाचार्याः फलसाधनताचार्यभावनान्वयल ॥ ॥

मा

स्वर्गकामस्य साम्यगुणत्वेन ... प्रवृत्तिज्ञानविषयो नार्थ्या तत्त्वेनोपस्थापितया = ६ प्रवृत्तिसाधनत्वस्य
प्रकृत्यर्थप्रत्ययार्थयोः प्रत्यार्थः प्रधानं न तस्मिन्नेव वचन गुणसंबंध इति न्यायान् इत्यर्थः ८ साधनत्वे =

सुर्थीभावनायवलम्व = २

गी॰ टी॰ मस्र॰ ७

17

स्येत्युक्तं प्राक् इदमेव पदं पार्थसारथिप्रभृतयः पंडिताः प्रतिपन्नाः औपनिषदानामपि केषांचिदिष्टसाध
नतावादो नैनैव मतेनोपपादनीयः। इष्टसाधनत्वं स्वर्गपशुग्रामादिपदशक्यं न प्रेरणात्वेनेति तार्कि
काः। तन्न गौरवादन्वयलभ्यत्वादनन्वयायोग्यत्वाच्च इच्छाविषयसाधनत्वापेक्षया प्रवर्तनात्वमतिलघुनु
क्तात्तद्विषयत्वाप्रवेशादिच्छाज्ञानस्यापि प्रवृत्तिज्ञानवत्। प्रवृत्तिहेतुत्वापातात्। वस्तुगत्याय
इच्छाविषयस्तत्साधनमिति शब्देन प्रतिपादयितुमशक्यत्वात्॥ साधनत्वमात्रस्यैव शक्तित्वे चते।
नैव प्रत्ययेनोपस्थापितया प्रवृत्त्या सह पशुत्यातदन्वयसंभवे पदांतरोपस्थापित स्वर्गग्रामसहवा
दैन तदन्वयासंभवात् प्रवर्तनात्व एव पर्यवसानं। श्रुत्या वाक्यस्य वाधात् प्रत्ययश्रुतेः पदश्रुतितो
पि वलीयस्त्वेन पशुना यजेतेत्यत्र प्रकृत्यर्थं पशुं विहाय प्रत्ययार्थेन करणेन संबंधे वैकत्वस्यान्वया
देकं करणं पशुरिति वचनव्यक्त्याक्रान्तत्वे गतमेकत्वस्यास्थिते किमुवक्तव्यं पदांतरसमभिव्याहार
रूपाद्वाक्यात्प्रतीयमानमिति वाक्यार्थानन्वयलभ्यत्वाच्चेष्टसाधनत्वपदार्थः॥ तथाहि प्रवर्तनाक
मेप्रेता पुरुषप्रवृत्तिरूपार्थीभावना किं केन कथमित्यंशत्रयवती विधिना ख्यातत्वेन प्रतिपाद्यते इ
त्युक्तं प्राक्। अत्र पुरुषार्थकर्मिकायां चतस्यां प्रवर्तनानपयन्नेरेकपदोपस्थापितमपि स्वपुरुषार्थया
त्वर्थं विहाय भिन्नपदोपात्तमन्यविशेषणमपि कामपदसंबंधेन साध्यतान्वययोग्यं स्वर्गमेव पुरुषा
र्थं साभाव्यतयालंबते इच्छाविषयस्यैव कृतिविषयत्वनियमात्। स्वर्गकामयते स्वर्गकाम इति कर्म
ण्युपपन्नहेतोर्याया यास्वतंत्रत्वात्। यजेतेरकर्मकत्वेन स्वर्गमित्युक्तेनन्वयाच्चात एव यत्र कामपदं न

प्रवृत्तिसाधनत्वस्य शक्तित्वे = ३

अर्थीभावनायां = ४

अर्थीभावना

विध्यर्थ

१२

प्रत्ययार्थोद्देशेन प्रकृत्यर्थविधिः प्रत्ययश्रुतिर्यथा ... भावनोद्देशेन लिङर्थ शाब्दीभावनाविधिः इदमेव समानाभिधानश्रुतिः पदश्रुतिस्तु
प्रत्ययार्थोद्देशेन प्रकृत्यर्थविधिर्यथा यजेतेत्यत्र भावनोद्देशेन यागविधिः प्रत्ययार्थो भावना प्रकृत्यर्थो यागः ॥५

भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते इति भावना वाचिभ्योपि भावो भावनेत्यादिभ्यो नापूर्वाधिगतिरिति कर्मशब्दा इत्युक्तम् धात्वर्थवाचिभ्यः
कर्मशब्देभ्योपि याग इत्येवमादिभ्यो नापूर्वाधिगतिरिति भावार्थाधिकरणे ... प्रतो धात्वर्थो परतो भावना ... लक्षणो धर्थो विधीयते इति सूत्रार्थः

तितिष्ठंति द्रव्यायत्तादीक्षयंतीत्यादौ प्रतिषु कामारावित्रपे पुविभ्यादि यवेच्च लक्षभाष्यायातस्यासमान
पदोपस्थापितेनाधात्वर्थ एव करणत्वयात्वेति। भाव्यांशस्य कामविषयत्वेनावरुद्धत्वात्। सुविभक्तियोगेपि धा
त्वर्थनामधेये ज्योतिष्टोमादौ तृतीयाश्रवणात्। यत्रापि नामधेये द्वितीया श्रूयते। तत्रापि व्यत्ययानुशास
नेन तृतीयाकल्पनात्। तदुक्तं महाभाष्यकारैः अग्निहोत्रं जुहोतीति तृतीयार्थे द्वितीयेति अत एव तेः प्र
कृति प्रत्ययौ प्रकृत्यर्थप्रत्ययार्थौ सहब्रूतः तयोः प्रत्ययार्थः प्राधान्येन प्रकृत्यर्थो गुणत्वेनेति प्रत्यया
र्थभावनां प्रति धात्वर्थस्य गुणत्वेन करणत्वमुक्तं। आख्यातं क्रियाप्रधानमिति वदद्भिर्निरुक्तकारैरप्ये
तदेवोक्तं भावार्थाधिकरणे च तत्स्थितं। तेन सर्वत्र प्रत्ययार्थं प्रति धात्वर्थस्य करणत्वेनैवान्वयनिय
मः अत एव गुणविशिष्टधात्वर्थविधौ धात्वर्थानुवादेन केवलगुणविधौ च मत्वर्थलक्षणाविधे
र्विप्रकृष्टविषयत्वं च यथा सोमेन यजेतेति विशिष्टविधौ सोमवता यागेनेति दध्ना जुहोतीति गुण
विधौ दधिमता होमेनेति नामधेयान्वये समानाधिकरण्योपपत्तेः॥ धात्वर्थमात्रविधानात्तु न मत्वर्थ
लक्षणा न वा विधिविप्रकर्षः। तदेवं ज्योतिष्टोमेन यजेत स्वर्गकाम इत्यत्राख्यातार्थो भावयेदिति
किमित्याकांक्षायां कामविषये स्वर्गमिति विधिश्रुतेर्बलीयस्त्वात्। आकांक्षायाउक्तेजकत्वाच्च त
थाव स्थिते षष्ठ्याये ततः केनेत्यपेक्षिते यागेनेति तृतीयांतपदसमानाधिकरणत्वात् करणत्वेनैवा
न्वयनियमाच्च किंनाम्नेत्यपेक्षिते ज्योतिष्टोमेनेतन्नाम्ना इत्यर्थः शब्दादनुपस्थितोपि ज्योतिष्टो
मशब्दो भासत एव शाब्दबोधे श्रवणेनोपस्थापितत्वात् धात्वर्थवशात्। नामधेयान्वये च न विभक्त्यर्थाः

यागस्य करणत्वं तृतीयाश्रुत्या कृतिसाध्यत्वमर्थात्

ग

गी॰टी॰ मश्र॰ १८ पे

18

योनाम नगाधिराज इति हिमालयनामवानित्यर्थः। एवमिह प्रभिन्नकमलोदरे मधूनि मधुकरः पिब
तीत्यादावगृहीतसंगतिकैकपदवति वाक्ये मधुकरादिपदं स्वरूपेणावभासते नामधेयवत् नाभि ना
न्नपदस्यायमिति। प्रागगृहीतसंगतिकत्वात्। अत एव मधुकरशब्दवाच्य इत्यपि लक्षणायानन्वयः म
प्राक्ज्ञानपूर्वकत्वाल्लक्ष्यज्ञानस्य स्वरूपतः लक्षणाद्भावे तेवाच्यवाचकसंबंधः पश्चात्कल्प्यते
संगतिनिर्वाहायेति तदर्थवाक्यार्थः ज्योतिष्टोमनाम्ना यागेन स्वर्गमिष्टं भावयेदिति कथमित्यपे
क्षिते श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यातः समवाय्युपकारकेइ उपकारकांगग्राममपेक्षेति वि
कृतौ प्रकृतिवदित्युपदेशेन नित्ययथाशक्त्युपदेशेन संख्यालाभे प्रतिनियतापीति चाच
न्नोऽर्थलभ्यतत्करणं॥ एवं च यागस्य स्वर्गावच्छिन्नभावनाकरणत्वेन स्वर्गकरणत्वं करणत्वेन
न्याय= करणमहस= स्वसाध्यात्मकतृव्यापारविषयत्वरूपं कृतिसाध्यत्वं च श्रुत्यर्थाभ्यां लभ्यत इति तदुभयमपि न लि
ङादिपदवाच्यं। अप्राप्ते शास्त्रमर्थवदिति न्यायात् अनन्वयाच्च इष्टसाधनमिति समासे गुणीभू
तमिष्टपदं स्वर्गकाम इति समासांतरगुणीभूतेन स्वर्गपदेन कथमन्वियात्। इष्टस्वर्गसाधन
मिति। नहि राजपुरुषो वीरपुत्र इत्यत्र राजपदवीरपदयोरन्वयोऽस्ति। पदार्थः पदार्थेनान्वेति न त
पदार्थैकदेशेनेति न्यायात् करणविभक्त्या तज्ज्योतिष्टोमादिनामधेयानन्वयप्रसंगादिदोषा
ज्योतिष्टोमे नेति=३ श्चास्मिन्पक्षे द्रष्टव्याः। एतेनेष्टसाधनत्वमनिष्टसाधनत्वं कृतिसाध्यत्वमिति त्रयमपि विध्य
र्थ इत्यपास्तं। अतिगौरवादर्थवादानामर्थवत्त्वावैयर्थ्यापत्तेश्चातः एव कृतिसाध्यत्वमात्रं विध्यर्थ १८

इष्टसाधनपदार्थस्य लिङादिपदवाच्यतेन गुणीभूतेष्टपदार्थस्य स्वर्गकामपदार्थान्तरगुणीभूतेन स्वर्ग
पदार्थेन कथमन्वियात् =

प्रेरणा ज्ञानं=२ यागादि=३

त्रैः । अलौकिकोतियोगत्वेलौकिकत्वादेवनविध्यर्थःपराक्रांतेचात्रसूरिभिः । तस्मादन्यलभ्याल
घुभूतांचप्रेरणोवलिङादियदवाच्येतिस्थितेप्रवर्तकंतज्ज्ञानंवावाक्यार्थमर्यादालभ्यंअन्यदेवसर्वे
षामपिवादिनांआख्यातार्थएवचविशेष्यतयाभासमानयागेनयात्तेर्थोननामार्थः स्वर्गकामोवेतिचोक्तप्रा
यमेवतेनचयागान्कुलंकृतिमान्स्वर्गकामइतितार्किकमतेपुरुषविशेषकवाक्यार्थज्ञानमपा
स्तसंदेहेयेणामतंभाट्टमिदंमंमत्रोपपादितं ॥ यदुक्तव्यमिहात्यन्तदनुसंधेयमाकरात् ॥१८॥ उदा
नींज्ञानज्ञेयज्ञातृरूपस्यकरणकर्मकर्तृरूपस्यचत्रिकद्वयस्यत्रिगुणात्मकत्ववक्तव्यमिति
तदुभयंसंक्षिप्यत्रिगुणात्मकत्वंप्रतिजानीते ॥ ज्ञानंप्राग्व्याख्यातंज्ञेयमप्यत्रैवान्तर्भूतंज्ञानोपा
धिकत्वाज्ज्ञेयस्यस्वकर्म । क्रियात्रिविधंकर्मसंग्रहइत्यत्रोक्ता । चकारात्करणंकर्मकारकयोर

ज्ञानंकर्मचकर्ताच । त्रिधैवगुणभेदतः । प्रोच्यतेगुणसंख्याने ॥ यथावच्छृणुतान्यपि ॥१९॥

न्तर्भावः । क्रियोपाधिकत्वात्कारकत्वस्यकर्ताक्रियायानिर्वर्तकः चकाराज्ज्ञाताच । कर्तुःक्रि
योपाधिकत्वेपिपृथग्गुणपकथनं । उक्ततार्किकभ्रमकल्पितात्मत्वनिवारणार्थम् । तेहिक
र्तैवात्मेतिमन्यंते । गुणाःसत्वरजस्तमांसितसम्यक्कार्यभेदेनव्याख्यायंतेप्रतिपाद्यंतेयस्मिंस्त्रि
गुणसंख्यानेकापिलंशास्त्रंतस्मिन् । ज्ञानंक्रियाचकर्ताचगुणभेदतःसत्वरजस्तमोभेदेनत्रि
धैवप्रोच्यते । एवकारोविधांतरनिरासार्थः । यद्यपिकापिलंशास्त्रंपरमार्थब्रह्मैकत्वविषयेनप्र
प्रमाणं । तथाप्यपरमार्थगुणगौणभेदनिरूपणेव्यावहारिकंप्रामाण्यंभजतइति वदसमा

स्त

गी० टी०
नि मस्र
१९

रप्युक्तं तत्रानैरपि प्रसिद्धमिदं न केवलमस्मिन्नेव तन्त्रे इति स्मृतिः। यथावत्। यथाशास्त्रं शृणु। श्रोतं सा
वधानो भव तानि ज्ञानादीनि अपि शास्त्रान्तरेऽपि जातानि च गुणभेदकृतानि। अत्र चैवं कल्पो न कर्तव्यं
एवं। चतुर्दशेऽध्याये तत्र सत्त्वं निर्मलत्वादित्यादिना गुणानां बन्धहेतुत्वप्रकारो निरूपितो गुणाती
तस्य जीवन्मुक्तत्वनिरूपणाय सप्तदशे पुनर्यजन्ते सात्त्विका देवानित्यादिना गुणकृतत्रिविधः
स्वभावनिरूपणेनासुरं राजसतामसः स्वभावं परित्यज्य सात्त्विकाहारादिसेवया दैवीसंपदर्जनीये
त्युक्तं। इह तु स्वभावतो गुणातीतस्यात्मनः क्रियाकारकफलसंबंधो नास्तीति निदर्शयितुं॥ तेषाम्
वैषां त्रिगुणात्मकत्वमेव न त्वन्यान्तरमस्ति येनात्मसंबंधिता स्यादित्युच्यते इति विशेषः॥१९॥ एवं
ज्ञानस्य कर्मणः कर्तुश्च प्रत्येकं त्रैविध्ये ज्ञानत्वेन प्रतिज्ञाते प्रथमं ज्ञानत्रैविध्यं निरूपयति।
सर्वभूतेषु येनैकं। भावमव्ययमीक्षते। अविभक्तं विभक्तेषु। तज्ज्ञानं विद्धि सात्त्विकं। २०।
त्रिभिः श्लोकैः तत्राद्वैतवादिनो सात्त्विकं ज्ञानमाह। सर्वेषु भूतेषु अव्याकृतहिरण्यगर्भविराड्
ज्ञेषु बीजसूत्रस्थूलरूपेषु समष्टिव्यष्ट्यात्मकेषु परस्परं व्यावृत्तेषु नानारूपेषु सर्वेष्वपि त्वनेन
वतिवीहेभूतेष्वित्यनेन भवनधर्मकत्वमुच्यते। तेन त्वयानि विनाशशीलेषु अव्ययमत्यन्ति विना
शादिसर्वविक्रियाशून्यमनुस्यूतमविभक्तमव्यावृत्तं सर्वज्ञानमेकं। अपि तत्र न तयावायावयिन याच
एकमद्वितीयं भावं परमार्थसज्ञानरूपं स्वप्रकाशानंदमात्मानमीक्षते तान्तःकरणपरिणामभेदेन वेदां
तवाक्यविचारपरिनिष्पन्नेन साक्षात्करोति। तन्नित्यापरोक्षं च वाक्यमहं नाम दर्शनं सात्त्विकं
सर्वसंसारोच्छित्तिकारणं ज्ञानं विद्धि हेतद्दर्शनेन राजसतामसं च संसारकारणं न सात्त्विकमिति

गी० टी० ध
१९

नशब्दः आगुक्तसात्त्विकव्यतिरेकप्रदर्शनार्थः । पृथक्त्वेन भेदेन स्थितेषु सर्वभूतेषु देहादिषु नानाभावान्प्र

श्रीनाम् तिदेहमन्यात् । आत्मनः पृथग्विधान् । सुखित्वदुःखित्वादिरूपेण परस्परविलक्षणान् ॥ येन ज्ञानेन वे-

त्तीति वक्तव्ये यज्ज्ञानं वेत्तीति करणे कर्तृत्वोपचारात् । एधांसि पचतीतिवत् । कर्तुरहंकारस्यानेकत्वभेदा वेत्तुः वेदन वृत्ति =

नेवं ज्ञातज्ञानं विद्धि राजसमिति पूर्वं ज्ञानपदमात्मभेदज्ञानमनात्मभेदज्ञानं च परामृशति । ये नाममनो

आत्मनाम् परस्परं भेदस्तेषामीश्वराद्भेदः । ईश्वरादन्योन्यतश्चाचेतनवर्गस्य भेद इत्येवं यार्हिकभेदपंचक धि

आत्मभ्यः ज्ञानेन तार्किकाणां राजसमेवेत्यभिप्रायः । २१ । तुशब्दो राजसाद्भिनत्ति विकृतेषु भूतकार्येषु विषमा

नेषु एकस्मिन्कार्ये भूतदेहे विकारे प्रतिमादौ वा । अहैतुकं हेतुरुपपत्तिः तद्रहितमन्येषां भूतकार्या

पृथक्त्वेन तु यज्ज्ञानं । नानाभावान्पृथग्विधान् । वेत्ति सर्वेषु भूतेषु । तज्ज्ञानं विद्धि राजसम् २१ ।

यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकं । अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतं । २२ ॐ ।

मूलकार्यस्य णामात्मत्वाभावे कथमेकस्यैतादृशस्यात्मत्वमित्युपपत्तेरभावात्तथात्वेन कृत्स्नवत्परिपूर्णवत्सक्तं । एतावाने

वात्मा ईश्वरो वा । नातः परमस्तीत्यभिनिवेशेन लग्नं । यथा दिगंबराणां सावयवो देहपरिमाण आत्मे

ति । यथा चार्वाकाणां देह एवात्मेति । एवं पाषाणदार्वादिमात्रमीश्वर इत्येकस्मिन्कार्ये सक्तमहैतुक

त्वादेवातत्त्वार्थवत् ॥ तत्त्वार्थलवतं अल्पं च नित्यविभुत्वाग्रहात् । ईदृशं नित्यविभुदेहातिरि-

क्तात्मनश्चातिरिक्तेश्वरग्राहितार्किकज्ञानविलक्षणं अनित्यपरिछिन्नदेहाद्यात्माभिमानरूपं

चार्वाकादीनां यज्ज्ञानं तत्तामसमुदाहृतं । तामसानां प्राकृतजनानामीदृशं ज्ञानं ॥ २२ ॥ रामजी

तदेवमोयनिषद्दानामहेतात्मदर्शिनोसात्विकमनुपादेयमनुमृत्वाभिःहेतदर्शिनोतुनित्यविभुपरस्प
गीटी॰ रविभिन्नात्मदर्शिनोराजसं। अनित्यपरिच्छिन्नात्मदर्शिनोचतामसंचहेयमनुक्तं। सप्रतित्रिविधं
मम्र॰ कर्मोच्यते॥ नियतंयावदंगोपसंहारासमर्थानामपिफलावशेषभावव्याप्तंनित्यमितियावत्। संगः
२॰ अहमेवमहायाज्ञिकइत्याद्यभिमानरूपोहंकारापरपर्यायोराजसोगर्वविशेषःतेनरहितंसंग
रहितंयावदज्ञानेनकर्तृत्वभोक्तृत्वप्रवर्तकोहंकारोनवर्तितएवासात्विकस्यतद्रहितस्यतत्त्व कर्माधिकारिता:
मु विदोनकर्माधिकारइतिक्रमसकृत॥ रागोराजसंमानादिकमनेनलप्स्येइत्यभिप्रायःद्वेषःश

20 नियतंसंगरहित। मरागद्वेषतःकृतं॥ अफलप्रेप्सुनाकर्म॥ यत्तत्सात्विकमुच्यते। २३॥
यत्तुकामेप्सुनाकर्म। साहंकारेणवापुनः॥ क्रियतेवहुलायासं। तद्राजसमुदाहृतम्२४

त्रुमनेनपराजेष्येइत्यभिप्रायःताभ्यांनकृतमरागद्वेषतःकृतं। अफलप्रेप्सुनाफलाभिला॰
षरहितेनकर्त्रायत्कृतंकर्मयागदानहोमादितत्सात्विकमुच्यते॥२३॥ सात्विकाद्भिन्नतिका॰ तु
मेप्सुनाफलकामेनकर्त्रासाहंकारेणवापुनःप्रागुक्तसंगात्मकगर्वयुक्तेनवा॥ वाशब्दःसमुच्च
येः॥ पुनश्चित्यनियतंयावत्कामेन॥ काम्याहृत्तेःफलायासंसर्वांगोपसंहारेणातिक्लेशावहंयत्काम्यं
कर्मक्रियते। तद्राजसमुदाहृतं। अत्रसर्वविशेषणोःसात्विकसर्वविशेषणाव्यतिरेकोदर्शितः२४ २॰
प विन्ह २ क
इतिकराजसंभावनवैरिपराजयपारविंकस्वमीदि:–२

अनुबंधं पश्चाद्भाव्यशुभं क्षयं शरीरसामर्थ्यस्य धनस्य च नाशं हिंसां प्राणिपीडां पौरुषमात्मसाम
र्थ्यं च अनपेक्ष्य अपर्यालोच्य मोहात्केवलाविवेकादेवारभ्यते ॥ यत्कर्म यच्चापि युद्धं तत्तामसमुच्य
ते ॥२५॥ इदानीं त्रिविधः कर्ता उच्यते । मुक्तसंगः त्यक्तफलाभिसंधिः । अनहंवादी ॥ कर्ताहमिति न वदन
शीलो भवति ॥ स्वगुणश्लाघाहीनो वा धृतिः विघ्नाद्युपस्थितावपि प्रारब्धापरित्यागहेतुर्धृतिः उत्साह
स्त्रिविशेषः धैर्यमुत्साहः । इदमहं करिष्याम्येवेति निश्चयात्मिका बुद्धिः धृतिहेतुभूताभ्यां संयुक्तः
धृत्युत्साहसमन्वितः कर्मणः क्रियमाणस्य फलस्य सिद्ध्यसिद्ध्योश्च हर्षशोकाभ्यां हेतुभ्यां यो विका

च अनुबंधं क्षयं हिंसामनपेक्ष्य च पौरुषं ॥ मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥२५॥
मुक्तसंगोनहंवादी । धृत्युत्साहसमन्वितः ॥ सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते
रागी कर्मफलप्रेप्सु । र्लुब्धो हिंसात्मकोऽशुचिः । हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः २७

रः वदनविकारम्लानत्वादिः तेन रहितः सिद्ध्यसिद्ध्योर्निर्विकारः केवलं शास्त्रप्रमाणप्रयुक्तो न फलरागे
णः अत एवंभूतः कर्ता सात्त्विक उच्यते ॥२६॥ रागी कामाद्याकुलचित्तः अत एव कर्मफलप्रेप्सुः कर्म
फलार्थी लुब्धः परद्रव्याभिलाषी धर्मार्थे स्वद्रव्यत्यागासमर्थश्च स्वाभिप्रायप्रकटनेन परहृन्निर्भे
दनं हिंसा तदात्मकः तत्स्वभावः स्वाभिप्रायाप्रकटनेन तैः कृतिकश्चित्भेदः अशुचिः शास्त्रोक्तशौच
हीनः सिद्ध्यसिद्ध्योः कर्मफलस्य हर्षशोकान्वितः एवंविधः कर्ता राजसः परिकीर्तितः ॥२७॥ रामा

अयुक्तः सर्वदा विषयापहृतचित्तत्वेन कर्तव्येष्वनवहितः प्राकृतः असंस्कृतबुद्धिर्बालसमः स्तब्धो
गीटी॰ गुरुदेवतादिष्वपि अप्रणम्रः शठः परवंचनार्थमन्यथाजानन्नप्यन्यथावादी नैष्कृतिकः स्वस्मिन्न
मअ॰ पकारकत्वभ्रममुत्पाद्य परवृत्तिच्छेदनेन स्वार्थपरः अलसः अवश्यकर्तव्येष्वपि अप्रवृत्तिशी
२१ लः विषादी सततमसंतुष्टस्वभावत्वेनानुशोचनशीलः दीर्घसूत्री नितरां तच्छ्वःकार्यं सहस्रकालेनातः कर
थं णात्वेन पतितम् अस्वस्थचित्तः यदद्य कर्तव्यं तन्मासेनापि करोति न वैत्येवंशीलश्च कर्ता तामस उच्यते २८ न
च देवं ज्ञानं कर्म कर्ता च त्रिधैवेव गुणभेदमात्रेणेति व्याख्यातं॥ संप्रति धृत्युत्साहसमन्वितस्य त्रस्त्विनयो
बुद्धिधृत्योस्त्रैविध्यं प्रतिजानीते बुद्धेरध्यवसायादिवृत्तिमत्याः त्रैविध्यं धृतेश्च तद्वृत्तेः सत्त्वादिगुणत

अयुक्तः प्राकृतः स्तब्धः। शठो नैष्कृतिकोलसः। विषादी दीर्घसूत्री च॥ कर्ता तामस उच्यते।२८।
बुद्धेर्भेदं धृतेश्चैव॥ गुणतस्त्रिविधं शृणु॥ प्रोच्यमानमशेषेण। पृथक्त्वेन धनंजय।२९।

त्रिविधमेव भेदं मया त्वां प्रति त्यक्तालस्येन परमाप्तेन प्रोच्यमानमशेषेण निरवशेषं पृथक्त्वे
न हेयादेयविवेकेन शृणु श्रोतुं सावधानो भव॥ हे धनंजयेति दिग्विजये प्रसिद्धमहिमानं स्वच
यत्नप्रोत्साहयति। अत्रेदं चिंत्यते। किमत्र बुद्धिशब्देन वृत्तिमात्रमभिप्रेतं। किं वा वृत्तिमदंतः
करणं प्रथमे ज्ञानं पृथगुक्तव्यं द्वितीये कर्ता पृथगुक्तव्यः इति मदन्तःकरणस्यैव कर्तृ
त्वात्॥ ज्ञानधृत्योः पृथग्ग्रहणे देयपर्णचनच क्रोदिपरिसंख्यार्थं तद्वृत्तिमदंतःकरणत्रैविध्य
कथनेन सर्वासामपि तद्वृत्तीनां त्रैविध्यस्य विवक्षितत्वात्। उच्यते। अंतःकरणोपहितस्त्वदाभा २१

ज्ञानं कर्म च कर्ता चेत्युक्तम्

21

अन्तःकरणं

नौशहन्तउपहितमन्तिकृष्ण। उपाधिमात्रेकरणत्वेनविवक्षितं। सर्वत्रकरणोपहितसकर्तृत्वात्
यद्यपिचकामःसंकल्पोविचिकित्साश्रद्धाधृतिरधृतिःह्रीर्धीर्भीरित्येतत्सर्वंमनएवेतिश्रुत्यनुदिता
नांसर्वासामपिवृत्तीनांत्रैविध्यंविवक्षितं॥ तथापिधीधृत्योःत्रैविध्यंपृथगुक्तं॥ ज्ञानशक्तिक्रिया
शक्त्युपलक्षणार्थंनतुपरिसंख्यार्थमितिनिरहंकरं॥ २९॥ तत्रबुद्धेस्त्रैविध्यमाहत्रिभिः। प्रवृत्तिंक
र्ममार्गंनिवृत्तिंसंन्यासमार्गंकार्यंप्रवृत्तिमार्गेकर्मणांकरणं॥ अकार्यंनिवृत्तिमार्गेकर्मणामक-
रणंभयंप्रवृत्तिमार्गेगर्भवासादिदुःखतःअभयंनिवृत्तिमार्गेतदभावे॥ बंधंप्रवृत्तिमार्गेमिथ्या

प्रवृत्तिंचनिवृत्तिंच। कार्याकार्येभयाभये। बंधंमोक्षंचयावेत्ति॥ बुद्धिःसापार्थसात्त्विकी
ययाधर्ममधर्मंच। कार्यंचाकार्यमेवच। अयथावत्प्रजानाति। बुद्धिःसापार्थराजसी ३१॥

ज्ञानकृतंकर्तृत्वाद्यभिमानेमोक्षंनिवृत्तिमार्गेतत्त्वज्ञानकृतमज्ञाननत्कार्याभावंचयावेत्तिकरणेऽ
कर्तृत्वोपचारात्ययावेत्तिकर्ताबुद्धिःसाप्रमाणजनितनिश्चयवतीहेपार्थसात्त्विकी॥ वंधर्मोद्वा
योरंतेकीर्तनात्तद्विषयमेवप्रवृत्त्यादिव्याख्यातं। ३०। धर्मंशास्त्रविहितमधर्मंशास्त्रप्रतिषिद्धं अ
दृष्टार्थमभयंकार्यंचाकार्यंचदृष्टार्थमभयम् अयथावदेवप्रजानाति। यथावन्नजानाति॥ कि
मिदमिदमित्थंनवेतिवा॥ अनध्यवसायसंशयेवाभजते॥ ययाबुद्ध्यासाराजसीबुद्धिःअत्र

तमसाविशेषादर्शनविधिनादोषेणावृता या बुद्धिरधर्मं धर्ममिति मन्यते। अन्यदप्यर्थे सर्वत्र विपर्यस्यति
तथा सर्वार्थान्॥ सर्वानपि ज्ञेयपदार्थान् विपरीतानेव मन्यते॥ सा विपर्ययवती बुद्धि
स्तामसी॥३२॥ इदानीं धृतेस्त्रैविध्यमाह त्रिभिः। योगेन समाधिनाऽव्यभिचारिण्या अविनाभूतया समा
धिव्याप्तया धृत्या प्रयत्नेन मनसः प्राणेन्द्रियाणां च क्रियाश्चेष्टाः धारयते। उत्शास्त्रप्रवृत्तेर्नि
रुणद्धि यस्यां सत्यामवश्यं समाधिर्भवति यया च धार्यमाणाया। मनआदिक्रियाः शास्त्रमतिक्र
म्य नाधीनतरमवगाहन्ते सा धृतिः सात्त्विकी हे पार्थ॥३३॥ तः सात्त्विकाद्भिन्नं प्रसंगेन कर्तव्या।

अधर्मं धर्ममिति या। मन्यते तमसावृता॥ सर्वार्थान्विपरीतांश्च। बुद्धिः सा पार्थ तामसी ३२
धृत्या यया धारयते। मनःप्राणेन्द्रियक्रियाः। योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्वि
की॥३३॥ यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन। प्रसंगेन फलाकांक्षी धृतिः सा पा
र्थ राजसी। यया स्वप्नं भयं शोकं॥ विषादं मदमेव च। न विमुञ्चति दुर्मेधा धृतिः सा पार्थ

धर्मितिवेशेन फलाकांक्षी सन्। यया धृत्या धर्मकामार्थांश्च धारयते नित्यं कर्तव्यतया धारय
ति॥ न तु मोक्षं कदाचिदपि सा राजसी धृतिः हे पार्थ॥३४॥ स्वप्नं निद्रां भयं त्रासं शोकमिष्टवि
योगनिमित्तं संतापं विषादं गिन्द्रियावसादं॥ मदमशास्त्रीयविषयसेवोन्मत्तत्वं। यया न विमुं
चत्येव। किंतु मदेव कर्तव्यतया मन्यते दुर्मेधाः विवेकासमर्थः सा धृतिः तामसी हे पार्थ॥३५॥

एवं क्रियाणां कारणानां च गुणतस्त्रैविध्यमुक्त्वा तत्फलस्य सुखस्यापि त्रैविध्यं प्रतिजानीते श्लोकार्थेन
मे मम वचनात् शृणु हेयादेयविवेकार्थं व्यासंगान्तरनिवारणेन मनःस्थिरीकुरु । हे भरतर्षभेति
योग्यता दर्शिता ॥ सात्विकं सुखमाह सार्धेन । अभ्यासादिति । यत्र सुखे समाधिजसुखे अभ्यासात् अतिपरि
चयाद्रमते ॥ परितुष्टो भवति न तु विषयसुखवत् सद्य एव ॥ यस्मिंश्च समाराधाच्च दुःखस्य सर्वस्या
न्तमवसानं निःशेषं गच्छति । न तु विषयसुखवत् अन्ते महद्दुःखं ॥ ३६ ॥ तदेव विवृणोति । यदग्रे ज्ञा
नवैराग्यध्यानसमाध्यारंभे अत्यन्तायासनिर्वाह्यत्वात् ॥ विषमिव दुःखविशेषावहं भवति । परि
णामे ज्ञानवैराग्यादिपरिपाके तु अमृतोपमं प्रीत्यतिशयास्पदं भवति ॥ आत्मविषया बुद्धिरात्म

सुखं त्विदानीं त्रिविधं । शृणु मे भरतर्षभ । अभ्यासाद्रमते यत्र ॥ दुःखान्तं च निगच्छति ३६ ।
यत्तदग्रे विषमिव ॥ परिणामेऽमृतोपमं ॥ तत्सुखं सात्त्विकं प्रोक्तं । मात्मबुद्धिप्रसादजं ३७

बुद्धिस्तस्याः प्रसादो निद्रालस्यादिराहित्येन स्वच्छतयावस्थानं ततो जातमात्मबुद्धिप्रसादजं । ननु
राजसमपि विषयेन्द्रियसंयोगजं नवानाममृतमिव निद्रालस्यादिजमीदृशं यदनात्मबुद्धिनिद्रा
द्यात्मबुद्धिप्रसादजं समाधिसुखं तत्सात्विकं प्रोक्तं योगिभिः ॥ अपरस्याह । अभ्यासादाहा
रो यत्र रमते प्रीयते । यत्र च दुःखावसानं प्राप्नोति तत्सुखं त्रिविधं गुणभेदेन शृणुवति तस्य
दाध्याहारेण पूर्वस्य श्लोकस्यान्वयः ॥ यत्तदग्र इत्यादि श्लोके तु सात्विकसुखलक्षणमिति भाष्य

सं

विषयाणामिंद्रियाणां च संयोगाज्जातं । तत्त्वात्मबुद्धिप्रसादाद्यत्तदिति प्रसिद्धं स्रक्चंदनवनितासंगादि
सुखमग्रे प्रथमारंभे ॥ मनः प्रमादिक्लेशाभावादमृतोपमं । परिणामे तु ऐहिकपारत्रिकदुःखाव
गी॰टी॰ हत्वाद्विषमिव तत्सुखं राजसं स्मृतं । ३८ ॥ अग्रे प्रथमारंभे चानुबंधे परिणामे च यत्सुखमात्मनो
अ॰१८ मोहकरं निद्रालस्ये प्रसिद्धे । प्रमादः कर्तव्यार्थावधारणामंतरेण मनोराज्यमात्रं तेभ्य एवोत्तिष्ठा
२३ ति न तु सात्त्विकमिव बुद्धिप्रसादजं ॥ न वा राजसमिव विषयेंद्रियसंयोगजं तन्निद्रालस्यप्रमा
दोत्थं तामसं सुखमुदाहृतं ॥ ३९ ॥ इदानीमनुक्तमपि संगृह्णन् प्रकरणार्थमुपसंहरति भग

23

विषयेंद्रियसंयोगा । द्यत्तदग्रेमृतोपमं ॥ परिणामे विषमिव । तत्सुखं राजसं स्मृतं ३८
यदग्रे चानुबंधे च । सुखं मोहनमात्मनः ॥ निद्रालस्यप्रमादोत्थं । तत्तामसमुदाहृतं
न तदस्ति पृथिव्यां वा । दिवि देवेषु वा पुनः ॥ सत्त्वं प्रकृतिजैर्मुक्तं । यदेभिः स्यात्त्रिभिर्गुणैः ४०

वान् ॥ सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः ततो जातैः वैषम्यावस्थां प्राप्तैः प्रकृतिजैः न तु साक्षा
ति द्गुणानां प्रकृतिजत्वं [illegible]स्तद्रूपत्वात् ॥ तस्माद्वैषम्यावस्थैव तद्रूपत्वानुपचारात् ॥ अथवा प्र दै
कृतिर्माया तत्प्रभवैस्तत्कल्पितैः प्रकृतिजैरेभिस्त्रिभिर्गुणैः बंधनहेतुभिः सत्त्वादिभिः मु
क्तं हीनं सत्त्वं प्राणिजातमप्राणि वा यत्स्यात् ॥ तत्पुनः पृथिव्यां मनुष्यादिषु दिवि देवेषु वा
नास्ति क्वापि गुणत्रयरहितमनात्मवस्तु नास्तीत्यर्थः । ४० । श्रीरामचंद्राय नमो नमः ॥ ॥ २३

तदेवं सत्त्वरजस्तमोगुणात्मकः क्रियाकारकफललक्षणः सर्वः संसारो मिथ्याज्ञानकल्पितो ऽनर्थ
स्तद्देशाध्यायोक्त उपसंहृतः पंचदशे चोर्ध्वमूलवृक्षरूपकल्पनया तमश्वत्थमेनं सुविरूढमू
लमसंगशस्त्रेण दृढेन छित्वा ॥ ततः पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्तंति भूयः ॥ इत्यसंग
शस्त्रेण विषयवैराग्येणात्मच्छेदनं कृत्वा परमात्मान्वेष्टव्य इत्युक्तं ॥ तत्र सर्वस्य त्रिगुणात्मकत्वे
त्रिगुणात्मकस्य संसारवृक्षस्य कथं छेदः ॥ असंगशस्त्रस्य सेवा न उपपन्नेत्याशंकायां स्वस्वामि

ब्राह्मणक्षत्रियविशां । शूद्राणां च परंतप ॥ कर्माणि प्रविभक्तानि । स्वभावप्रभवैर्गु
णैः ॥ ४१ ॥

कारविहितैः वर्णाश्रमधर्मैः परितोष्यमाणात्परमेश्वरात् ॥ असंगशस्त्रलाभ इति विवक्षितमेता ।
वानेव सर्ववेदार्थः परमपुरुषार्थमिच्छद्भिरनुष्ठेय इति च गीताशास्त्रे उपसंहृते व्य इत्येवमर्थम
नंतरप्रकरणमारभ्यते ॥ तत्रेदं सूत्रं ॥ ब्राह्मणानां समासकरणं द्विजत्वेन वेदाध्ययनादितुल्यधर्मत्वक
थनार्थं शूद्राणामसमासः पृथक्करणमेकजातित्वेन वेदाध्ययनादिरहितत्वेनानधिकारित्वज्ञापनार्थं

गीटी॰ २५

वर्णाः ब्राह्मणक्षत्रियवैश्यशूद्राः तेषां त्रयो वर्णाः द्विजातयः ब्राह्मणक्षत्रियवैश्याः । तेषां मातुरग्रेऽधिजननं
द्वितीयं मौञ्जिबन्धने ॥ अत्रास्य माता सावित्री पिता त्वाचार्य उच्यत इति तथा प्रतिविशिष्टं ॥ चातुर्वर्ण्यस्याना
विशेषात्संस्कारविशेषाच्च । ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽ
जायतेत्यपि निगमो भवति । गायत्र्या ब्राह्मणमसृजत् ॥ त्रिष्टुभा राजन्यं ॥ जगत्या वैश्यं । न केनचिच्छन्द
सा शूद्रमित्यसंस्कार्यो विज्ञायत इति । शूद्रश्चतुर्थो वर्णः एकजातिरिति च गौतमः । हे परंतप शत्रुतापन
तेषां चतुर्णामपि वर्णानां कर्माणि प्रकर्षेणाविभक्तानि इतरेतरविभागेन व्यवस्थितानि ॥ कैः स्वभा
वप्रभवैर्गुणैः ॥ ब्राह्मणादिस्वभावस्य प्रभवैर्हेतुभूतैः गुणैः सत्त्वादिभिः । तथाहि । ब्राह्मणस्वभावस्य
सत्त्वगुण एव प्रभवः प्रशान्तत्वात् ॥ क्षत्रियस्वभावस्य सत्त्वोपसर्जनं रज ईश्वरस्वभावत्वात् वैश्यस्वभावस्य
तम उपसर्जनं रजः ईहास्वभावत्वात् ॥ शूद्रस्वभावस्य रज उपसर्जनं तमः मूढस्वभावत्वात् । अथवा
मायाख्या प्रकृतिः स्वभावः तत उपादानात्प्रभवो येषां तैः प्राग्भवीयः संस्कारो वर्तमाने भवे स्वफला
भिमुखत्वेनाभिव्यक्तः स निमित्तत्वेन प्रभवो येषामिति वा शास्त्रस्यापि पुरुषस्वभावसापेक्षत्वा
त् ॥ शास्त्रेण प्रविभक्तान्यपि गुणैः प्रविभक्तानीत्युच्यन्ते ॥ आख्यातानामर्थं बोधयतामर्थकारि
शक्तिः सहकारिणीति न्यायात् ॥ तथाहि गौतमः द्विजातीनामध्ययनमिज्या दानं ब्राह्मणस्या
धिकाः प्रवचनयाजनप्रतिग्रहाः पूर्वेषु नियमस्तु राज्ञः अधिकं रक्षणं सर्वभूतानां न्यायाद
ण्डत्वं वैश्यस्याधिकं कृषिवाणिज्यं पशु ॥ श्रीरामकृष्ण ॥ ॥ ॥ ॥ ॥ ॥

अध्ययनेज्यादाने ब्रू वैश्यकर्त्तव्यता =२
आख्यातानां वदन्तोऽविधिपदानामर्थो विधेयो बोधयन्ती शक्तिः सा स्वार्थस्य सहकारिणी स्वपदार्थ
नैकदेशत्वादिति पूर्वमीमांसायां सिद्धो न्यायः । अर्थात्सामर्थ्याद्वा एकत्वानां एकदेश

पाल्यं कुसीदं च शूद्रः ॥ चतुर्थो वर्ण एकजातिः ॥ तस्यापि सत्यमक्रोधः शौचमाचमनार्थं पाणिपादप्र
क्षालनमेवैके श्राद्धकर्म भृत्यभरणं स्वदारवृत्तिः ॥ परिचर्योत्तरेषामिति ॥ अत्र मायावरणाः असाधार
णास्वधर्मा उक्ताः ॥ पूर्वेषु अध्ययनेज्यादानेषु नियमः ॥ अवश्यकर्तव्यत्वं ॥ न तु प्रवचनयाजनप्रतिग्र
हेषु वृत्त्यर्थत्वादित्यर्थः ॥ वणिज्जो भावो वाणिज्यं कुसीदं ॥ वृद्ध्यै धनप्रयोगः ॥ उत्तरेषामिति श्रेष्ठा
नां द्विजातीनामित्यर्थः ॥ वसिष्ठोपि षट्कर्माणि ब्राह्मणस्याध्ययनमध्यापनं यज्ञो याजनं दानं प्र
तिग्रहश्चेति त्रीणि राजन्यस्य ॥ अध्ययनं यज्ञो दानं च शस्त्रेण च प्रजापालनं स्वधर्मस्तेन जीवेत् । ए
तान्येव त्रीणि वैश्यस्य ॥ कृषिवणिक्पशुपाल्यं कुसीदं च तेषां परिचर्या शूद्रस्येति । आपत्स्वपि
चत्वारो वर्णाः ॥ ब्राह्मणक्षत्रियवैश्यशूद्राः ॥ तेषां पूर्वः पूर्वो जन्मतः श्रेयान् स्वकर्मणा । ब्राह्मण
स्याध्ययनमध्यापनं यज्ञो याजनं प्रतिग्रहणं दानं शिलोञ्छः ॥ अन्यच्चापरिगृहीतं एतान्येव क्षत्रि
यस्याध्यापनयाजनप्रतिग्रहणानि परिहार्य युद्धं दण्डादिकं नित्यं क्षत्रियस्य वैश्यस्य दण्डयुद्धवर्जं
कृषिगोरक्ष्यवाणिज्यानि कं परिचर्या शूद्रस्येतरेषां वर्णानामिति ॥ मनुरपि । अध्यापनमध्य
प्रति यनं यजनं याजनं तथा ॥ दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत् ॥ प्रजानां रक्षणं दानमिज्याध्य
यनमेव च । विषयेष्वप्रसक्तिं च क्षत्रियस्य समादिशत् ॥ वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव
च । एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत् । एतेषामेव वर्णानां शुश्रूषामनसूयया इति ॥ एवं

गी॰टी॰ म अ॰ २५ 25

तत्रब्राह्मणस्यस्वाभाविकगुणकृतानिकर्माण्याह।शमःअंतःकरणोपरमःप्रागुक्तःदमोबाह्यकरणो
परमःप्रागुक्तःतपःशारीरादि॥देवद्विजगुरुप्राज्ञेत्यादावुक्तं।शौचमपिबाह्याभ्यंतरभेदेनप्रागुक्तं
क्षांतिःक्षमाअन्यैराकृष्टस्यताडितस्यवामनसिविकाररहित्यंप्राग्व्याख्यातं॥आर्जवमकौटिल्यंप्रागु
क्तं॥ज्ञानंसांगोपांगवेदतदर्थविषयं॥विज्ञानंकर्मकांडेयज्ञादिकर्मकौशल्यंब्रह्मकांडेब्र।
ह्मात्मैक्यानुभवः।आस्तिक्यंसात्विकीश्रद्धाप्रागुक्ता॥एतत्शमादिनवकंस्वभावजंसत्वगुणस्व
भावकृतंब्रह्मकर्मब्रह्मजातेःकर्म॥यद्यपिचतुर्णामेववर्णानांसात्विकावस्थायामेतेगुणाःसं
भवंति।तथापिबाहुल्येनब्राह्मणेभवंति॥सत्वस्वभावत्वात्तस्यसत्वोद्रेकवशेनत्वस्यत्रापिकदा
चिद्भवंतीतिशास्त्रांतरेसाधारणधर्मतयोक्ताः॥तथाचविष्णुः॥क्षमासत्यंदमःशौचंदानमिंद्रि

शमोदमस्तपःशौचंक्षांतिरार्जवमेवच॥ज्ञानंविज्ञानमास्तिक्यंब्रह्मकर्मस्वभावजं४२॥

यसंयमः॥अहिंसागुरुशुश्रूषातीर्थानुसरणंदया॥आर्जवंलोभशून्यत्वं॥देवब्राह्मणपूजनं।
अनभ्यसूयाचतथाधर्मःसामान्यउच्यते॥सामान्यः।चतुर्णामपिवर्णानांतथाप्रायेणचतुर्णा
मप्याश्रमाणामित्यर्थः॥तथाचबृहस्पतिः॥दयाक्षमानसूयाचशौचानायासमंगले॥अका
र्पण्यमस्पृहत्वंसर्वसाधारणमिच॥परेवाबंधुवर्गेवामित्रेद्वेष्टरिवासदा।आपन्नेरक्षितव्यं
तद्दयेषापरिकीर्तिता॥बाह्येवाध्यात्मिकेचैवदुःखेचोत्पादितेक्वचित्॥नकुप्यतिनवाहंतिसा २५

क्षमापरिकीर्त्तितां गुणान्गुणिनो हन्ति स्तौति मन्दगुणानपि। नान्यदोषेषु रमते सानसूया प्रकीर्त्तिता
अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिन्दितैः। स्वधर्मे च व्यवस्थानं शौचमेतत्प्रकीर्त्तितं॥ शरीरं पीड्यते ये
न सुशुभेनापि कर्मणा॥ अत्यन्तं तन्न कर्त्तव्यमनायासः स उच्यते॥ प्रशस्ताचरणं नित्यमप्रशस्तविव
र्ज्जनं॥ एतद्धि मंगलं प्रोक्तं मुनिभिस्तत्त्वदर्शिभिः॥ स्तोकादपि प्रदातव्यमदीनेनान्तरात्मना। अह
न्यहनि यत्किंचिदकार्पण्यं हि तत्स्मृतं॥ यथोत्पन्नेन संतोषः कर्त्तव्यो ह्यर्थवस्तुना॥ परस्याचिन्त
यित्वार्थं सास्पृहा परिकीर्त्तिता॥ एत एवाष्टावात्मगुणास्त्वनेन गौतमेन पठिताः अथाष्टावात्मगुणाः
दया सर्वेषु भूतेषु क्षान्तिरनसूया शौचमनायासो मंगलमकार्पण्यमस्पृहेति॥ तथा महाभा
रते॥ सत्यं दमस्तपः शौचं संतोषो ह्रीः क्षमार्जवं। ज्ञानं शमो दयाध्यानमेष धर्मः सनातनः। स
त्यं भूतहितं प्रोक्तं मनसो दमनं दमः॥ तपः स्वधर्मवर्त्तित्वं शौचं संकरवर्ज्जनं॥ संतोषो विषयत्या
गो ह्रीरकार्यनिवर्त्तनं॥ क्षमा द्वन्द्वसहिष्णुत्वमार्जवं समचित्तता। ज्ञानं तत्त्वार्थसंबोधः शम
श्चित्तप्रशान्तता। दया भूतहितैषित्वं ध्यानं निर्विषयं मनः॥ देवलः॥ शौचं दानं तपः श्रद्धा गुरु
सेवा क्षमा दया। विज्ञानं विनयः सत्यमिति धर्मसमुच्चयः। तथा॥ व्रतोपवासनियमैः शरीरो
त्तापनं तपः। प्रत्ययो धर्मकार्येषु तथा श्रद्धेत्युदाहृता। नास्ति ह्यश्रद्दधानस्य धर्मकृत्ये प्रयोज
नं॥ यत्तु नवैदिकीनां च लौकिकीनां च सर्वशः॥ धारणं सर्वविद्यानां विज्ञानमिति कीर्त्यते॥ वि
नयं हि द्विविधं प्राहुः शम्स्वदमशमाविति। शेषं व्याख्यातप्रायमिति वचनानि न लिखितानि॥ या
ज्ञवल्क्यः॥ इज्याचारदमाहिंसादानस्वाध्यायकर्मणां॥ अयं तु परमो लाभो यद्योगेनात्मदर्शनं

गीटी॰
म॰
१८

26

क्षत्रियस्य गुणस्वभावकृतानि कर्माण्याह ॥ शौर्यं विक्रमो बलवत्त्वानपि प्रहर्तुं प्रवृत्तिस्तेजः प्रागल्भ्यं प
परैरधर्षणीयत्वं ॥ धृतिर्महत्यामपि विपदि देहेन्द्रियसंघातस्यानवसादः । दाक्ष्यं दक्षभावः सहसा
प्रत्युत्पन्नेषु कार्येषु अव्यामोहेन प्रवृत्तिः युद्धे चाप्यपलायनं । अपराङ्मुखीभावः ॥ दानमसंको
चेन विहितेषु स्वस्वत्वपरित्यागेन परस्वत्वापादनं ॥ ईश्वरभावः प्रजापालनार्थं शासितव्येषु प्रभुश
क्तिप्रकटीकरणं च ॥ क्षत्रकर्म क्षत्रियजातेर्विहितं कर्म स्वभावजं स्वभावो यस्मा[illegible]जेन रजोगु
णस्वभावजं ॥४४॥ कृषिः क्षेत्रोत्पत्त्यर्थं भूमिविलेखनं गोरक्षं गोरक्षणं । यासु पाल्यत्वमुपयास्त्वम
गोरक्षतीति गोरक्षस्तस्य भावो गौरक्ष्यं ॥ वाणिज्यं वणिजः कर्म क्रयविक्रयादिलक्षणं कुसीदमप्य
नतिमतीयं वैश्यकर्म वैश्यजातेः कर्म स्वभावजं तमउपसर्जनरजोगुणस्वभावजं परिचर्या

शौर्यं तेजो धृतिर्दाक्ष्यं ॥ युद्धे चाप्यपलायनं । दानमीश्वरभावश्च । क्षत्रकर्म स्वभावजं ४४ ॥
कृषिगोरक्ष्यवाणिज्यं । वैश्यकर्म स्वभावजं । परिचर्यात्मकं कर्म । शूद्रस्यापि स्वभावजम् ।

त्मकं द्विजातिशुश्रूषात्मकं कर्म शूद्रस्यापि स्वभावजं रजउपसर्जनतमोगुणस्वभावजम् ४५
तदेवं वर्णानां स्वभावजा गौणाख्या धर्मा अभिहिताः अन्येपि धर्माः शास्त्रेष्वाम्नाताः तदनुक्रमभि
धानद्वारेण ॥ धर्मः श्रेयः समुद्दिष्टं श्रेयोभ्युदयलक्षणं स तु पञ्चविधः प्रोक्तो वेदमूलः सनातनः
वर्णधर्मः स्मृतस्त्वेक आश्रमाणामतः परं वर्णाश्रमस्तृतीयस्तु गौणो नैमित्तिकस्तथा वर्ण
त्वमेकमाश्रित्याधिकारः प्रवर्तते स खल्वाश्रमधर्मः स्याद्भिक्षादण्डादिको यथा वर्णत्वमाश्रम
त्वं च यावत्कृत्य प्रवर्तते स वर्णाश्रमधर्मः स्यान्मौञ्ज्या यथा मेखला यथा । यो गुणेन प्रवर्तेत गुणधर्मः

यो धर्मः संप्रवर्तते वर्णधर्मः स उक्तस्तु यथोपनयनं नृप यस्त्वाश्रमं समाश्रित्य अधिकारः [illegible] शास्त्रार्थं ... मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतान्तवी = ८

चतुर्विधं धर्ममाह । हारीतः । अथाश्रमाणां पृथग्धर्मो विशेषधर्मः समानधर्मः कृत्स्नधर्मश्चेति ॥ पृथ-
गाश्रमानुष्ठानात्पृथग्धर्मः । यथा चातुर्वर्ण्यधर्मः स्वाश्रमविशेषानुष्ठानाद्विशेषधर्मः । यथा यो-
यावरन्निज्ञापिकं चान्तराश्रमप्रतिज्ञानां ॥ सर्वेषां यः समानो धर्मः स समानधर्मः नैमित्तिकः कृत्स्न-
धर्म इति ॥ नैष्ठिको ब्रह्मचारिविशेषः । यायावरो गृहस्थविशेषः । आत्मज्ञापिको वानप्रस्थवि-
शेषः । चान्तराश्रमप्रतिष्ठो यतिविशेषः । सर्वेषामितिवर्णानामाश्रमाणां च ॥ तत्राद्यो यथा म-
हाभारते ॥ आनृशंस्यमहिंसा चाप्रमादः संविभागिता श्राद्धकर्मातिथेयं च सत्यमक्रोध एव च
स्वेषु दारेषु संतोषः शौचं नित्यानसूयता । आत्मज्ञानं तितिक्षा च धर्मः साधारणो नृप सर्वाश्रम-
साधारणस्तु प्राग्व्याख्यातः । निष्कामं संसारसमाप्तिस्तत्प्रयोजनो नैमित्तिकः । मोक्षहेतुत्वात्तु ज्ञाना-
त्यन्तिप्रतिबन्धकप्रत्यवायपरिहाराय । निष्कामकर्मानुष्ठानं कृत्स्नधर्म इत्यर्थः । आश्रमास्तु शा-
स्त्रेषु चत्वार आम्नाताः । यथाह गौतमः तस्याश्रमविकल्पमेके ब्रुवते । ब्रह्मचारी गृहस्थो भिक्षु-
र्वैखानस इति । आपस्तम्बः ॥ चत्वार आश्रमाः गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थमिति तेषु सर्वे-
षु । यथोपदेशमव्यग्रो वर्तमानः क्षेमं गच्छतीति वसिष्ठः चत्वार आश्रमाः ब्रह्मचारिगृहस्थवान-
प्रस्थपरिव्राजकाः ॥ तेषां वेदमधीत्य । वेदौ वेदान्वा विशीर्णब्रह्मचर्यो यमिच्छेत्तमावसेदित्येवं
तेषां पृथग्धर्मा यथाम्नाताः । तथा फलमप्यज्ञानामाम्नातं यथाह मनुः ॥ श्रुतिस्मृत्युदितं धर्मम-
नुतिष्ठन्हि मानवः । इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखमिति । यथा आम्र पतत् फलोपल-
[illegible] आपस्तम्बः । सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखं ततः । परिवृत्तौ कर्मफल-

ज्योतिष्टोमेन स्वर्गकामो यजेत चित्रया यजेत पशुकामः ज्योतिष्टोमादिकर्मफलेन स्वर्गादिभोगं ... न तु कर्मफलशेषो मो
[illegible]

नुष्ठानमिति प्रतिपद्यते ॥ गौतमः ॥ वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय । ततः
शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते विष्वञ्चः विपरीता
नश्यन्ति । अत्र शेषशब्देन ज्योतिष्टोमादिकर्मातिरिक्तं चित्रादिकर्मानुशयशब्देनोच्यते । ननु
एवं कर्मण एकदेश इति स्थिते कृतात्ययेऽनुशयवान् ॥ दृष्टस्मृतिभ्यां यथेतमनेवं चेत्यत्र भेदे
रप्युक्तं ॥ गौतमीयेऽपि । तेक्केषफलस्मात्तिग्रायपेद्वयेति विष्वञ्चः सर्वतोगामिनो यथोक्तचेष्टाः
विपरीता नरकादौ जन्म प्रतिपद्य विनश्यन्ति ॥ किन्तु कीटादिभावेन सर्वपुरुषार्थेभ्यो भ्रश्य
न्त इत्यर्थः । हारीतः । काम्यैः केचिद्यज्ञदानैस्तपोभिर्लब्ध्वा लोकाननु नरा यान्ति जन्म ॥ कामो
न्मुक्ताः सत्यदानाः सत्यदीक्षाः सदा नासक्तयोनिष्वाश्रद्धया यान्ति लोकान् । अत्र कामना सदा
सद्भावनिबन्धनः । फलभेददर्शिनः । भविष्यपुराणे ॥ फलं विना त्वनुष्ठानं नित्यानामिष्यते
स्फुटं ॥ काम्यानां स्वफलार्थं तु दोषघातार्थमेव तु ॥ नैमित्तिकानां करणं त्रिविधं कर्मणां
फलं ॥ द्वयं केचिद्यात्तस्यङ्गितस्य प्रचक्षते ॥ अन्ये त्वनित्यता चान्ये प्रत्यवायस्य मन्वते नि
त्यानां क्रियतथाचान्ये अनुषङ्गफलां विदुः । अन्ये स्वार्थफलवादयः ॥ तद्यथा ॥ आम्रे फलार्थे
निर्मित इत्यादिवचनेनानुषङ्गिकफलतां नित्यकर्मणो विदुः ॥ श्रुतिश्च । त्रयो धर्मस्कन्धा यो
यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्त
मात्मानमाचार्यकुलेऽवसादयन्निति गृहस्थवानप्रस्थब्रह्मचारि[illegible] सर्व एते पुण्यलो
का भवन्तीति तेषामन्तःकरणशुद्ध्यभावे मोक्षाभावमभिप्रेत्य । अशुद्धान्तःकरणानामेषामेव पुरि

तदेवं स्वैः ब्रह्मचारिगृहस्थवानप्रस्थावानमुमुक्षुः फलाभिसंधित्यागेन भगवदर्पणबुद्ध्या । स्वे स्वे
तत्तद्वर्णाश्रमविहिते नित्यनैमित्तिके कर्मणि श्रुतिस्मृत्युदिते अभिरतः सम्यगनुष्ठानपरः
संसिद्धिं देहेन्द्रियसंघातस्य शुद्धिद्वारेण सम्यग्ज्ञानोत्पत्तियोग्यतां लभते नरो वर्णाश्रमाभिमानी

स्वे स्वे कर्मण्यभिरतः ॥ संसिद्धिं लभते नरः ॥ स्वकर्मनिरतः सिद्धिं । यथा विन्दति तच्छृणु ॥
४५

मनुष्यः मनुष्याधिकारत्वात्कर्मकाण्डस्य देवादीनां वर्णाश्रमाभिमानित्वाभावाद्युक्त एव तद्धर्मे-
ष्वनधिकारः ॥ वर्णाश्रमाभिमानानपेक्षत्वादुपासनादावधिकारस्तेषामप्यस्तीति सूचयितुं देव
ताधिकरणे नन्वेवं यद्धेतूनां कर्मणां कथं मोक्षहेतुत्वमपापविशेषादित्याह । स्वकर्मेति ॥ स्वक-
र्मनिरतः सिद्धिं ज्ञानयोग्यतां यथा येन प्रकारेण विन्दति लभते तच्छृणु । श्रुत्वा तेन प्रकारमवधार-

यतो मायोपाधिकचैतन्यानंदघनात् ॥ सर्वज्ञात्सर्वशक्तेरीश्वरादुपादानान्निमित्ताच्च सर्वान्तर्या
मिणः प्रवृत्तिरुत्पत्तिर्मायामयी स्वाप्नद्रष्ट्रादीनामिव भूतानां भवनधर्मिणामाकाशादीनां येन
गीटी० चैकेन सद्रूपेण स्फुरणरूपेण च सर्वमिदं दृश्यजातमेतद्वपि कालेषु ततं व्याप्तमात्मन्येवोत्तभा
मस्मं० वितकल्पितस्याधिष्ठानानतिरेकात् ॥ तथा च श्रुतिः यतो वा इमानि भूतानि जायंते येन जाता
२८ नि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति ॥ अत्र यत इति ॥ प्रकृतौ पंचमी
द्वि यतो येनेति चैकत्वं विवक्षितं आनंदो ब्रह्मेति व्यजानादानन्दाद्ध्येव खल्विमानि भूतानि जायंते

28

यतः प्रवृत्तिर्भूतानां । येन सर्वमिदं ततं ॥ स्वकर्मणा तमभ्यर्च्य । सिद्धिं विंदति मानवः ॥४६॥

इति च तस्यैव निर्णयवाक्यं ॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमित्यादिश्रुत्यंतराच्च मायो
पाधिलाभः ॥ यः सर्वज्ञः स सर्वविदित्यादिश्रुत्यंतरात्सर्वज्ञत्वादिलाभः ॥ एवं च श्रौत एवा
यमर्थो भगवता प्रकाशितः ॥ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं तमंतर्यामिणं भवंतं स्वक
र्मणा प्रतिवर्णाश्रमविहितेनाभ्यर्च्य तोषयित्वा तत्प्रसादादेकात्म्यज्ञाननिष्ठायोग्यतालक्ष
णां सिद्धिं मंतः करणशुद्धिं विंदति लभते मानवः देवादिस्तु उपासनामात्रेणेति भावः ॥४६॥ २८

यतः स्वधर्म एव मनुष्याणां भगवत्प्रसादहेतुरतः । परधर्मात्सम्यगनुष्ठितादपि श्रेयान्प्रशस्यतरः स्वधर्मो वि
गुणः असम्यगनुष्ठितोऽपि तस्मात्क्षत्रियेण सता त्वया स्वधर्मो युद्धादिरेवानुष्ठेयः । न परधर्मो भिक्षाटना
दिरित्यभिप्रायः । ननु स्वधर्मोऽपि युद्धादिर्हिंसा बंधुवधादिप्रत्यवायहेतुत्वान्नानुष्ठेय इति तत्राह । स्वभाव
नियतं पूर्वोक्तं शौर्यं तेज इत्यादिस्वभावजं युद्धादिकं कर्म कुर्वन् ॥ किल्बिषं पापं बंधुवधादिनिमित्तं न प्राप्नो
ति ॥ तथा च प्राग्व्याख्यातं ॥ सुखदुःखे समे कृत्वेत्यत्र विहितज्योतिष्टोमागपशुहिंसायामिव विहित
युद्धांगबंधुहिंसायामपि प्रत्यवायहेतुत्वाभावात् । तथा चोक्तमधस्तात् । ४८ ॥ यस्मादेवं विहितहिं
सादेर्न प्रत्यवायहेतुत्वं परधर्मस्तु भयावहः । सामान्यदोषेण च सर्वकर्माणि दुष्टानि तस्मादज्ञो वर्णा

श्रेयान्स्वधर्मो विगुणः । परधर्मात्स्वनुष्ठितात् ॥ स्वभावनियतं कर्म । कुर्वन्नाप्नोति किल्बिषं
सहजं कर्म कौंतेय । सदोषमपि न त्यजेत् । सर्वारंभा हि दोषेण । धूमेनाग्निरिवावृताः ४९ ॥

अमाभिमानी हे कौंतेय सहजं स्वभावजं कर्म सदोषमपि विहितहिंसायुक्तमपि ज्योतिष्टोमयुद्धादि
न त्यजेत् । अंतःकरणाशुद्धेः प्राकृ भवान् अन्यो वा । न ह्यनात्मज्ञः कश्चित्क्षणमपि कर्माण्यकृत्वा
स्थातुं शक्नोति । न च परधर्माननुतिष्ठन्नपि दोषान्मुच्यते । सर्वारंभाः स्वधर्मा परधर्माश्च सर्वाण्य
पि कर्माणि हि यस्मात् ॥ दोषेण त्रिगुणात्मकत्वेन सामान्येनावृताः व्याप्ताः सदोषा एव ॥ तथा च प्रा
ग्व्याख्यातं परिणामतापसंस्कारैः गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिन इति । तस्मादत्यागा
नात्मज्ञः कर्माणि कुर्वन् । विषजक्रिमिरिव विषं सहजं कर्म युद्धादि त्रिगुणात्मकत्वेन सामान्येन
बंधुवधादिनिमित्तेन विशेषेण च सदोषमपि न त्यजेत् सर्वकर्मत्यागासमर्थत्वात् ॥ सर्वकर्म

गीटी॰
मध्य॰
२५

29

कः पुनः सर्वकर्मत्यागसमर्थः यो नित्यानित्यवस्तुविवेकजेनेहामुत्रार्थभोगवैराग्येण शमदमादिभि
र्युक्तः संपन्नः कर्मजां शुद्धिमशुद्धिपरिक्षयद्वारा समनुप्राप्तः मुमुक्षुः ब्रह्मात्मैक्यजिज्ञासां प्राप्तः स तत्त्वेष्टमो
क्षहेतुब्रह्मात्मैक्यज्ञानसाधनवेदान्तवाक्यश्रवणादिकर्त्तुं सर्वविक्षेपनिवृत्त्या निश्शेषभूतं सर्वका
र्मसंन्यासं श्रुतिस्मृतिविहितं कुर्यादेव तस्मादेवं वित्॥ शान्तो दान्त उपरतस्तितिक्षुः समाहितो
भूत्वात्मन्येवात्मानं पश्येदिति श्रुतेः सत्यानृते सुखदुःखे वेदानिमं लोकममुं च परित्यज्या
त्मानमन्विच्छेदिति स्मृतेश्च॥ उपरतः त्यक्तसर्वकर्मा भूत्वात्मानं पश्येदात्मदर्शनाय वेदान्तवा
क्यानि विचारयेदिति श्रुत्यर्थः एतादृश एव ब्रह्मसंस्थोऽमृतत्वमेतीति श्रुत्या यमस्कन्धत्रय
विलक्षणत्वेन प्रतिपादितः परमहंसपरिव्राजकः॥ परमहंसपरिव्राजकं कृतकृत्यं गुरुमन्व

असक्तबुद्धिः सर्वत्र॥ जितात्मा विगतस्पृहः। नैष्कर्म्यसिद्धिं परमां। संन्यासेनाधिगच्छति

उक्ताधिका रिणम्= परस्य वेदान्तवाक्यविचारसमर्थो यमुद्दिश्य॥ अथातो ब्रह्मजिज्ञासेत्यादि। चतुर्लक्षणमी
मांसा भगवता बादरायणेन समारंभि कीदृशोऽसावित्याह असक्तबुद्धिरिति सर्वत्र पुत्रदारादि
षु सक्तिनिमित्तेष्वपि असक्तबुद्धिः अहमेषां ममैते इत्यभिष्वंगरहिता बुद्धिर्यस्य सः यतो जिता
त्मा सम्यग्विषयेभ्यः प्रत्याहृत्य वशीकृतान्तःकरणः विषयरागे सति कथं प्रत्याहरणं तत्रा
ह॥ विगतस्पृहः देहजीवितभोगेष्वपि वाञ्छारहितः सर्वदृश्येषु दोषदर्शनेन नित्यबोध
परमानन्दरूपमोक्षगुणदर्शनेन च सर्वतो विरक्त इत्यर्थः॥ य एवं शुद्धान्तःकरणः स्वकर्मणा
तमभ्यर्च्य सिद्धिं विंदतीति मानव इति वचनप्रतिपादितां कर्मजां मयज्ञोक्तसिद्धिं ज्ञानसाधनवेदा २५

थिकारलक्षणां ज्ञाननिष्ठायोग्यतां प्राप्तः सन्न्यासेन शिखायज्ञोपवीतादिसहितसर्वकर्मत्या
गेन हेतुना तत्त्वविवेकेन विचारेणेत्यर्थः॥ नैष्कर्म्यसिद्धिं निष्कर्मब्रह्म तद्विषयविचारपरिनिष्प
पा न्ने ज्ञाने नैष्कर्म्यरूपां सिद्धिं परमां कर्मज्ञानस्य परमसिद्धेः फलभूतामधिगच्छति तद्विषया
साधनपरिपाकेन प्राप्नोतीत्यथवा सन्न्यासेनेति॥ इत्थंभूतलक्षणोक्तनीया सर्वकर्मसन्न्यास
रूपां नैष्कर्म्यसिद्धिं ब्रह्मसाक्षात्कारयोग्यतां नैर्गुण्यलक्षणां सिद्धिं परमां सर्वस्याः सिद्धेः सा
त्त्विक्याः फलभूतामधिगच्छतीत्यर्थः॥५०॥ प्रागुक्तसाधनसंपन्नस्य सर्वकर्मसन्न्यासिनो ब्र
ह्मज्ञानोत्पत्तेः साधनक्रममाह सिद्धिमिति॥ स्वकर्मणेश्वरमाराध्य तत्प्रसादजां सर्वकर्मत्या

सिद्धिं प्राप्तो यथा ब्रह्म॥ तथाप्नोति निबोध मे॥ समासेनैव कौन्तेय। निष्ठा ज्ञानस्य या परा ५१॥

गपर्यन्तां ज्ञानोत्पत्तियोग्यतारूपां सिद्धिमन्तःकरणशुद्धिं प्राप्तो यथा ब्रह्म प्राप्नोति येन प्रकारे
णाशुद्धमात्मानं साक्षात्करोति॥ तथा तं प्रकारं निबोध मे मद्वचनादवधारयानुष्ठातुं॥ किमिति
विस्तरेणेत्याह॥ समासेन संक्षेपेणैव न तु विस्तरेणाहे कौन्तेय तदवधारणे किं स्यादित्यत आ
ह। निष्ठा ज्ञानस्य या परा ज्ञानस्य विचारपरिनिष्पन्नस्य निष्ठा परिसमाप्तिः यदनन्तरं साधनान्तरे
णानुष्ठेयमस्ति। परा श्रेष्ठा सर्वोत्कृष्टा साक्षान्मोक्षहेतुत्वात्। तां सिद्धिं प्राप्तस्य ब्रह्मप्राप्तिरूपां
ज्ञाननिष्ठां परां संक्षेपेण निबोधेत्यर्थः ५१॥

गी॰टी॰
मस्र॰
३॰

30

सेयं ज्ञाननिष्ठा सप्रकारोच्यते ॥ विशुद्धया सर्वसंशयविपर्ययशून्यया बुद्ध्या ऽहं ब्रह्मास्मीति वेदान्त
वाक्यजन्यया बुद्धिवृत्त्या युक्तः सदानन्दन्वितः धृत्या धैर्येणात्मानं शरीरेन्द्रियसंघातं नियम्यात्मा
ऽभिमुखं निवार्यात्मप्रवणं कृत्वा च शब्देन योगशास्त्रोक्तसाधनानां तत्र समुच्चीयते । शब्दादीन् । श
ब्दस्पर्शरूपरसगंधान् ॥ विषयान् भोगेनबंधहेतून् समर्थ्याज्ज्ञाननिष्ठार्थं शरीरस्थितिमा
त्रप्रयोजनानपयुक्तान् निषिद्धानपि त्यक्त्वा शरीरस्थितिमात्रार्थेषु तेषु रागद्वेषौ व्युदा
स्य परित्यज्य चकारादन्यदपि ज्ञानविघ्नरूपकं परित्यज्य विविक्तसेवीत्यत्र स्यादित्यध्याहृः

बुद्ध्या विशुद्धया युक्तो । धृत्यात्मानं नियम्य च । शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च
विविक्तसेवी लघ्वाशी । यतवाक्कायमानसः । ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ५२

तेन ब्रह्मभूयाय कल्प्यते इत्यनेनान्वयः ॥ ५२ ॥ विविक्तं जनसंमर्दरहितं पवित्रं च यदर
ण्यगिरिगुहादि तत्सेवितुं शीलं यस्य सः ॥ चित्तैकाग्र्यसंपादनार्थं तोहृ ह्नेपकादिरहितत्वा
र्थः लघ्वाशील लघु परिमितं हितं मेध्यं चाशितुं शीलं यस्य सः ... यमनियमासनादिसा
धनसंपन्नइत्यर्थः । ध्यानयोगं यतानि संयतानि वाक्कायमानसानि येन स चित्तस्यात्माका
रप्रत्याहृत्तिः ध्यानं स्वात्माकारप्रत्ययेन निर्हृत्तिकतापादनं योगः नित्यं सर्वदैव तत्परः तयो
रनुष्ठानपरो नत्वमंत्रजपतीर्थयात्रादिपरः कदाचिदित्यर्थः । वैराग्यं दृष्टादृष्टविषयेषु ।

३॰

पद्मानि स -३ (यतानि संयतानि वाक्कायमानसानि येन)

अहंकारं महाकुलप्रसूतोऽहं महतां शिष्योऽतिविरक्तोऽस्मि नास्ति मत्तुल्यो मत्सम इति अभिमानं बलमसत्
दाग्रहं न तु शारीरं ॥ तस्य स्वाभाविकत्वेनापरिहार्यत्वात् ॥ दर्पं हर्षजन्यं मदं धर्मातिक्रमकारणं हृ
ष्टो दृप्यति दृप्तो धर्ममतिक्रामतीति स्मरणात् ॥ कामं विषयाभिलाषं वैराग्यपरमप्राप्तितरत्वेनोक्तसा
धिकामत्यागस्य पुनर्वचनं ॥ यत्नानिवार्यं क्रोधं द्वेषं परिग्रहं शरीरधारणार्थमस्पृहत्वेऽपि परेणानीतं
वाह्यापकरणं विमुच्य त्यक्त्वा । शिखायज्ञोपवीतादिकमपि दण्डमेकं कमण्डलुं कौपीनमाच्छादनं च शा
स्त्राभ्यनुज्ञातं शरीरयात्रार्थमादाय परमहंसपरिव्राजको भूत्वा ॥ निर्ममः देहजीवनमात्रेऽपि मम
काररहितः ॥ अत एवाहंकारममकाराभावादपगतहर्षविषादत्वात् ॥ शान्तश्चित्तविक्षेपरहितः
यतिर्ज्ञानसाधनपरिपाकक्रमेण ब्रह्मभूयाय ब्रह्मसाक्षात्काराय कल्पते समर्थो भवति ५४ के

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहं ॥ विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते । ५४ ॥
ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ॥ समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ५५ ॥

न क्रमेण ब्रह्मभूयाय कल्पत इत्याह ॥ ब्रह्मभूतः अहं ब्रह्मास्मीति दृढनिश्चयवान् ॥ श्रवणम
ननाभ्यासात् ॥ प्रसन्नात्मा शुद्धचित्तः शमदमाद्यभ्यासात् (प्रसन्नात्मा शुद्धचित्तः) ॥ अत एव न शो
चति नष्टं न काङ्क्षति अप्राप्तं । अत एव निग्रहानुग्रहयोरनारम्भात् समः सर्वेषु भूतेषु आत्मौपम्येन
सर्वत्र सुखं दुःखं च पश्यतीत्यर्थः ॥ एवंभूतो ज्ञाननिष्ठो यतिः मद्भक्तिं मयि भगवति शुद्धे परमा
त्मनि भक्तिमुपासनां मदाकारचित्तवृत्त्यावृत्तिरूपां परिपक्वनिदिध्यासनाख्यां श्रवणमननाभ्या
सफलभूतां लभते । परां श्रेष्ठामव्यवधानेन साक्षात्कारफलां चतुर्विधा भजन्ते मामित्यत्रोक्तस्य भ

ततश्च भक्त्या निदिध्यासनात्मिकया ज्ञाननिष्ठया मामद्वितीयमभिजानाति साक्षात्करोति । यावान्विभुः
नित्यश्च । यश्चापि सर्वात्मा सत्यज्ञानानंदघनः सदाविध्वस्तसर्वोपाधिः अखंडैकरस एकः तावंतं चा
भिजानातीति ॥ ततो मामेवं तत्त्वतो ज्ञात्वा । अहमस्मि । अखंडानंदाद्वितीयं ब्रह्मेति साक्षात्कृत्य
विशते ॥ अज्ञानतत्कार्यनिवृत्तौ सर्वोपाधिशून्यतया मद्रूप एव भवति ॥ तदनंतरं च ॥ बलवा
त्प्रारब्धकर्मभोगेन देहपतनानंतरं ॥ ननु ज्ञानानंतरमेवैक्यप्रत्ययेनैव तल्लाभे तदनंतरमि
त्यस्य वैयर्थ्यापातात् ॥ तस्मात्तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये इति श्रुत्यर्थ एवात्र

भक्त्या मामभिजानाति । यावान्यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरं ।५६॥

दर्शितो भगवता यद्यपि ज्ञानेनाज्ञाने निवर्तितमेव । दीपेनेव तमस्तस्य तद्विरोधिस्वभावत्वात् । त
थापि तदुपादेयमहंकारदेहादि निरुपादानमेव यावत्प्रारब्धकर्मभोगमनुवर्तते दृष्टत्वादेव । न
हि दृष्टे अनुपपन्नं नाम । ननु किं केनापि हि समवायिकारणनाशे द्रव्यनाशमंगीकुर्वद्भिर्निरूपा
दाने द्रव्यं क्षणमात्रं तिष्ठतीत्यंगीकृतं ॥ नित्यपरमाणुसमवेतद्व्यणुकनाशे तु समवायिका
रणनाशादेव द्रव्यनाशः ॥ समवायिनिरूपित । ॥ ॥ श्रीरामकृष्णायनमोनमः ॥ ॥ ॥ ३१

समवायिपरमाणु द्वयं नष्टं किंतु असमवायिकारणं परमाणुद्वयसंयोगस्तन्नाशत

समवायिकारणनाशे समवायिकारणनाशे च = १ देहादिनाशे = ३ देहादिनाशस्य = ७ अज्ञानतत्परिणामस्य उपादानरहितात् = १
प्रथमं समवायिकारणनाशस्ततो समवायिकारणनाशस्ततो द्रव्यनाशः नाम् = निवर्तो ज्ञानमात्माश्रयो यस्य = ८

कारणनाशात्तन्तुभयोरन्यतमनिमित्तनाशान्नश्यतः ॥ येत्वसमवायिकारणनाशमेव सर्वत्र कार्यद्रव्यनाशक
२ मिच्छंति तेषामाश्रयनाशस्य लेशत्वाद्द्रव्यमनुपादाने कार्यं तिष्ठति ॥ एवं च तत्रैव प्रतिबंधसन्निपातेन व
कुलालावस्थितिः केन वार्यते प्रारब्धकर्मणाश्च प्रतिबंधकत्वं श्रुतिसिद्धं । अंतःकरणादेहाद्यवस्थि
त्यन्यथानुपपत्तिसिद्धं च ॥ एवं च शिष्यसेवकाद्यदृष्टमपि तत्प्रतिबंधकं तदभावमपेक्ष्य च सर्वेषा प्रतिबंधकाभावे सति =
तु एवाज्ञाननाशस्तत्कार्यमंतःकरणादिकं नाशयतीति न पुनर्ज्ञानापेक्षा ॥ तदुक्तं ॥ तीर्थे श्वपचा।
गृहे वा नष्टस्मृतिरपि परित्यजन्देहं ॥ ज्ञानसमकालमुक्तः कैवल्यं याति हतशोकः इति न ज्ञाना।
मीत्यादिप्रत्ययलाभस्य निरन्तरज्ञानस्याप्यज्ञाननाशजनितादनुपादानात्साक्षादात्माश्रयादेवा।
दनुवृत्ति ज्ञानसंस्काराल्लिंगस्यान्तःकरणस्थित्यवधेयेति विवरणकृतः ॥ अहं ब्रह्मास्मीति चरमसा
क्षात्कारानंतरमहं ब्रह्म न जानामीत्यादिप्रत्ययानापत्त्येव यदि परं हेत्वस्यानुपादानाय चेयं चरमसं
स्कारकल्पनेति नानुपपन्नं ॥ अज्ञानलेशपदेनापि तमेव संस्कारो विवक्षितः ॥ न हि सावयवाज्ञा।
ज्ञाने येन किंचन्नश्यति किंचन्न तिष्ठतीति वाच्यं अनिर्वचनीयत्वादेकदेशाभ्युपगमेन न निवृत्तस्यार्थे
पुनश्चरमं ज्ञानमपेक्षितमेव । न च स्मृतिकालेऽदृष्टमिति । तत्त्वज्ञानसंस्कारनाशपक्षानभ्युपेया।
ततश्च ॥ संस्कारपक्षान्न कोऽपि विशेष इति पूर्वोक्तैव कल्पना श्रेयसी इदं जीवन्मुक्त्यपेक्षया प्रा।
गुभगवतोक्तं ॥ उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः इति स्थितप्रज्ञलक्षणानि व्याख्यामातनुमा
यथा

ं न जानामीत्यादिप्रत्ययः चरमः =

२

गीटी॰
मध्य॰
३२
32

ननु यः अनात्मज्ञः अशुद्धांतःकरणः सः अंतःकरणशुद्धिपर्यंतं तमद्दत्तं कर्म न त्यजेत् ॥ यस्तु शुद्धां
तःकरणः स नैष्कर्म्यसिद्धिं संन्यासेनाधिगच्छतीत्युक्तं ॥ संन्यासस्तु ब्राह्मणेनैव कर्तव्यो न क्षत्रि
यवैश्याभ्यां इति प्रागुक्तं भगवता कर्मणैव हि संसिद्धिमास्थिता जनकादय इत्यत्र ॥ तत्र शुद्धांतः
करणेन क्षत्रियादिना किं कर्माण्यनुष्ठेयानि ॥ किं वा सर्वकर्मसंन्यासः कर्तव्यः । नाद्यः ॥ आ
रुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ॥ योगारूढस्य तस्यैव शमः कारणमुच्यते इत्यादिना यो
गमंतःकरणशुद्धिमारूढस्य कर्मानुष्ठाननिषेधात् ॥ न द्वितीयः स्वधर्मे निधनं श्रेयः परध
र्मो भयावह इत्यादिना ब्राह्मणधर्मस्य सर्वकर्मसंन्यासस्य क्षत्रियादिकं प्रति निषेधात् ॥ न

सर्वकर्माण्यपि सदा । कुर्वाणो मद्व्यपाश्रयः । मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययं ।५७॥

च कर्मानुष्ठानकर्मत्यागयोरन्यतरमंतरेणान्यतरीयः प्रकारोऽस्ति तस्मादुभयोरपि प्रतिषिद्ध
त्वे गत्यंतराभावेन चावश्यकर्तव्यप्रतिषेधात् क्षेमकर्मत्याग एव श्रेयान्त्वेयहेतुपरित्यागेन
मोक्षसाधनयोग्यफलत्वात् ॥ ननु कर्माण्यनुष्ठेयानि चित्तविक्षेपहेतुत्वेन मोक्षसाधनप्रतिबं
मि धकत्वादित्यभिप्रायमर्जुनस्यालक्ष्याह भगवान् यं पूर्वोक्तैः कर्मभिः शुद्धांतःकरणः सोऽवश्य
भगवदेकशरणः । भगवदेकशरणतापर्यंतत्वादंतःकरणशुद्धेः एतादृशस्य ब्राह्मणस्य
संन्यासप्रतिबंधरहितः स सर्वकर्माणि संन्यस्यन्नाम ॥ संसा ॥ ॥ ॥ राम ॥ ॥ ३२

रविमोचयस्तत्तस्य भगवद्देकशरणस्य भगवत्प्रसादादेव ॥ एतादृशश्चेन्द्रत्रियादिः सन्न्यासानधिका
रीसन्करोतु नाम कर्माणि किं तस्य तद्व्यपाश्रयः ॥ अहं भगवान्वासुदेव एव व्यपाश्रयः शरणं यस्य स
मदेकशरणो मय्यर्पितसर्वात्मभावः सन्न्यासानधिकारात्सर्वकर्माणि सर्वाणि कर्माणि वर्णाश्र
मरूपाणि लौकिकानि प्रतिषिद्धानि वा सदा कुर्वाणो मत्प्रसादात्परमेश्वरस्यानुग्रहाद्‍वाप्नोति हिर
ण्यगर्भवत्सम्यग्ज्ञानोत्पत्त्या शाश्वतं नित्यं पदं वैष्णवमव्ययमपरिणामि ॥ एतादृशो भगवदेकशर
णः करोत्येव न प्रतिषिद्धकर्माणि यदि कुर्यात्तथापि मत्प्रसादात्प्रत्यवायानुत्पत्त्या सम्यग्ज्ञानेन मो
क्षभाग्भवतीति भगवदेकशरणतातात्पर्यं सर्वकर्माण्यपि सदा कुर्वाणोपीत्युच्यते ॥ ५७ ॥ य
चेतसा सर्वकर्माणि । मयि सन्न्यस्य मत्परः ॥ बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव । ५८ ॥
स्मान्मदेकशरणतामात्रेणोत्तमसाधनेन कर्मानुष्ठाने कर्मसन्न्यासी वा तस्मात्त्वं त्रियपत्त्वं ॥ चेतसा वि
वेकबुद्ध्या सर्वकर्माणि दृष्टादृष्टार्थानि मयीश्वरे सन्न्यस्य । यत्करोषि यदश्नासीत्युक्तन्यायेन स
मर्प्य मत्परः ॥ अहं भगवान्वासुदेव एव परः प्रियतमो यस्य स मत्परः सन् ॥ बुद्धियोगं पूर्वोक्त
समत्वबुद्धिलक्षणं योगं वंधहेतोरपि कर्मणो मोक्षहेतुत्वसंपादकमुपाश्रित्यानन्यशरणत
याखीकृत्य मच्चित्तः ॥ मयि भगवति वासुदेवे एव चित्तं यस्य न राजनिकामित्यादौ वा मनच्चिन्तः सततं

ततः किं स्यादिति तदाह ॥ मच्चित्तस्त्वं सर्वदुर्गाणि दुस्तराणि कामक्रोधादीनि संसारदुःखसाधना
नि मत्प्रसादात्त्वं व्यापारान्तरेण तरिष्यसि अनायासेनैवातिक्रमिष्यसि ॥ अथ चेद्यदि त्वं
मदुक्ते विश्वासमकृत्वा । अहंकारात्पण्डितोऽहमिति त्वं वा न श्रोष्यसि मद्वचनार्थं न करिष्यसि
ततो विनंक्ष्यसि पुरुषार्थाद्भ्रष्टो भविष्यसि कामचारेणासन्मार्गमाचरन् । त्वं च । अहंकारं यामि
कोऽहं क्रूरं कर्म न करिष्यामीति ॥ मिथ्याभिमानमाश्रित्य न योत्स्ये युद्धं न करिष्यामीति मन्यसे य
त् ॥ मिथ्या निष्फल एव व्यवसायो निश्चयस्ते तव यस्मात् ॥ प्रकृतिः क्षत्रजात्यारंभको रजोगु

मच्चित्तः सर्वदुर्गाणि । मत्प्रसादात्तरिष्यसि । अथ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि
यदहंकारमाश्रित्य । न योत्स्य इति मन्यसे ॥ मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्य
ति ६० । स्वभावजेन कौन्तेय । निबद्धः स्वेन कर्मणा ॥ कर्तुं नेच्छसि यन्मोहात्करिष्यस्य
वशोऽपि तत् ६१ ॥

णः स्वभावः त्वां नियोक्ष्यति प्रेरयिष्यति युद्धे ।६०। प्रकृतिं विवृणोति स्वभावजेन स्वकीयेन क्षत्रियस्व
भावजेन शौर्यादिना स्वेनानागतेन कर्मणा निबद्धो वशीकृतः त्वं हे कौन्तेय यद्युद्धं पुवधादिति
मितं युद्धं मोहात्स्वतंत्रोऽहं ॥ यथेच्छामि तथा संपादयिष्यामीति भ्रमात्कर्तुं नेच्छसि तदवशो
प्यनिच्छन्नपि स्वाभाविककर्मपरतंत्रः परमेश्वरपरतंत्रश्च करिष्यस्येव ।६१। श्रीरामायनमः २२

स्वभावाधीनतामुक्त्वा ईश्वराधीनतां विवृणोति ॥ ईश्वरः ईशानशीलो नारायणः सर्वान्तर्यामी यः ।
पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं ॥ यः पृथिवीमन्तरो यमयति ।
यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ॥ अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इत्यादि श्रुति
प्रसिद्धः सर्वभूतानां सर्वेषां प्राणिनां हृद्देशे अन्तःकरणे तिष्ठति सर्वव्यापकोऽपि तत्राभिव्यज्यते । ।
महीपाधिपतिरिव वामदृन्नवकोमलायां ॥ हे अर्जुन ॥ हे शुक्लस्वच्छान्तःकरण एतादृशमीश्वरं ।
त्वं ज्ञातुं योग्योऽसीति द्योत्यते । किं कुर्वन्तिष्ठति भ्रामयन् ॥ इतस्ततश्चालयन् ॥ सर्वभूतानि प

ईश्वरः सर्वभूतानां ॥ हृद्देशेऽर्जुन तिष्ठति ॥ भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ६२ ॥
तमेव शरणं गच्छ । सर्वभावेन भारत ॥ तत्प्रसादात्परां शान्तिं । स्थानं प्राप्स्यसि शाश्वतं ६२ ।

यन्त्राणि मायया छद्मना यन्त्रारूढानीव यन्त्रं चारादियन्त्रमारूढानि दारुनिर्मितपुरुषादीन्ये
तत्परतन्त्राणि यथा मायावी भ्रामयति तद्वदित्यर्थः । ६२ ॥ ईश्वरः सर्वभूतानि परतन्त्राणि प्रेर ।
यति चेत्प्राप्तं विधिप्रतिषेधशास्त्रस्य सर्वस्य पुरुषकारस्य चानर्थक्यमित्यत्राह ॥ तमेवेश्वरं
शरणमाश्रयं संसारसमुद्रोत्तरणार्थं गच्छाश्रय सर्वभावेन सर्वात्मना मनसा वाचा कर्मणा च ।
हे भारत ॥ तत्प्रसादात्तस्यैवेश्वरस्यानुग्रहात्तत्त्वज्ञानोत्पत्तिपर्यन्तात् । परां शान्तिं सकार्याविद्यानि

सर्वगीतार्थमुपसंहरन्नाह । इतीति इत्यनेन प्रकारेण मे मया अनंतं त्वं तदभिप्रायं ज्ञानमात्ममात्रविषयं मोक्ष
साधनं गुह्याद्गुह्यतरं परमरहस्यादपि सन्न्यासात्कर्मयोगाद्रहस्यतरं तत्फलभूतत्वादाख्यातं सम
न्तात्कथितं मया सर्वज्ञेन परमाप्तेनातो विमृश्य पर्यालोच्य ॥ एतन्मयोपदिष्टं गीताशास्त्रमशेषेण
सामस्त्येन सर्वं कृत्वा ततो यथाज्ञात्वाधिकारानुरूपेण यथेच्छसि तथा कुरु ॥ न त्वेतदविमृश्यैव
कामकारेण यत्किंचिदित्यर्थः । अत्र चैतावदुक्तमशुद्धांतःकरणस्य मुमुक्षोर्मोक्षसाधनज्ञानो
त्पत्तियोग्यताप्रतिबंधकपापक्षयार्थं फलाभिसंधिपरित्यागेन भगवदर्पणबुद्ध्या वर्णाश्रमध
र्मानुष्ठानं । ततः शुद्धांतःकरणस्य विविदिषोत्पत्तौ । गुरुमुपसृत्य ज्ञानसाधनवेदांतवाक्यवि

इति ते ज्ञानमाख्यातं । गुह्याद्गुह्यतरं मया । विमृश्यैतदशेषेण । यथेच्छसि तथा कुरु । ६४ ॥

चारायशुद्धान्तःकरणस्य सर्वकर्मसन्न्यासः । ततो भगवदेकशरणतया । विविक्तसेवादिज्ञानसाधनाभ्या
सात् ॥ श्रवणमनननिदिध्यासनेनात्मसाक्षात्कारेण मोक्षो भवतीति ॥ तत्र यद्यपि सन्न्यासा
धिकारिणो मुमुक्षोरंतःकरणशुद्ध्यनंतरमपि भगवदाज्ञापालनाय लोकसंग्रहाय च यथा
कथंचित्कर्माणि कुर्वतोऽपि भगवदेकशरणतया पूर्वजन्मकृतसन्न्यासादिपरिपाकाद्वा हिर
ण्यगर्भस्येव तदनपेक्षणाद्वा भगवदनुग्रहमात्रेणोत्पन्नज्ञानस्यात्मज्ञानेन तत्त्वज्ञानं स्या
णाजन्मलाभे न सन्न्यासादिरपेक्ष्यते ज्ञानेनात्मज्ञानमात्रादेव मोक्ष इत्येवं विविच्यानन्तरे च नास्ति मोहावकाश इति

अतिगंभीरस्य गीताशास्त्रस्याशेषतः पर्यालोचनक्लेशानिरूत्तये कृपया स्वयमेव तस्य सारं संक्षि-
प्य कथयति श्रीभगवान्॥ सर्वेभ्यो हि गुह्यात्कर्मयोगाद्गुह्यतरं ज्ञानमाख्यातम् अधुना तु कर्मयोगात्
फलं लभ्यते ज्ञानाच्च सर्वस्मादतिशयेन गुह्यं रहस्यं गुह्यतमं परमं सर्वतः प्रकृष्टं मे मम वचो वाक्यं भू-
यः तत्र तत्रोक्तमपि त्वदनुग्रहार्थं पुनर्वक्ष्यमाणं शृणु॥ न लाभपूजाख्यात्यार्थं त्वां ब्रवीमि किं-
तु इष्टः प्रियोऽसि मे मम दृढमतिशयेन॥ इति यतस्तस्मात्तेन ते तेन वक्ष्यामि कथयिष्यामि।

सर्वगुह्यतमं भूयः। शृणु मे परमं वचः॥ इष्टोऽसि मे दृढमिति
ततो वक्ष्यामि ते हितं। ६५॥

अदृष्टोऽपि तत्रहं ते तव हितं परमं श्रेयः। ६५। तदेवाह। मय्येव भगवति वासुदेवे मनो यस्य स
मन्मना भव सदा मां चिंतय। द्वेषेण कंसशिशुपालादिरपि तथा। अतस्त्वमाह मद्भक्तः प्रेमणा म-
य्यनुरक्तः मद्विषये रागानुरागेण सदा मद्विषयं मनः कुर्विति विधीयते। तद्विषयो नुरागप्र-
वर्तकेन स्यादित्यत आह मद्याजी मां यज पूजय नैशीलेय स्य मम॥ ॥ श्रीरामकृष्णायनमः

गीटी॰ मश्र ३५ सदामन्त्रजापरोभव ॥ यज्ञोपकरणाभावेन मां नमस्कुरु कायेन वाचा मनसा च प्रह्वीभवेनाराध
य इदं चार्चनं वंदनं वा अन्येषामपि भगवत्धर्माणामुपलक्षणं । तथा चोक्तं श्रीभागवते श्र
वणं कीर्तनं विष्णोः स्मरणं पादसेवनं ॥ अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनं । इति पुंसार्पिता वि
ष्णौ भक्तिश्चेन्नवलक्षणा ॥ क्रियेत भगवत्यद्धा तन्मन्येऽधीतमुत्तममित्यतश्च भक्तिरसायने व्याख्या
तं विस्तरेण ॥ एवं सदा भावितया मन्नुध्यानेन मय्यनुरागिण्यात्मा मत्परायणः सन् मां भगवंतमेवैष्यसि प्रा गे
प्स्यसि । वेदांतवाक्यजनितेन मद्बोधेन त्वं चात्र संशयं मा कार्षीः सत्यं यथार्थं ते तुभ्यं प्रतिजानेस

मन्मना भव मद्भक्तो । मद्याजी मां नमस्कुरु । मामेवैष्यसि सत्यं ते । प्रतिजाने प्रियोसि मे ॥
॥ ६५ ॥

त्वामेव प्रतिज्ञां करोम्यस्मिन्नर्थे ॥ यतः प्रियोसि मे प्रियस्य प्रतारणानौचित्येवेति भावः ॥ सत्यं ते सतिप्रत्ते
प्रारब्धकर्मरोगे सति मामेवैष्यसीति वा ॥ अनुवादापेक्षया विध्यांशस्यैव प्रयोजने प्रथमे । दार्ढ्य
व्याख्यानमेव श्रेयः अनेन पक्षेवं मन्तं ॥ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं ॥ स्वकर्मणा ।
तमभ्यर्च्य सिद्धिं विंदति मानव इति न्यायाख्याने सच्छद्वेनेश्वरत्व प्रकटनात् ॥ ६६ ॥ श्रीरामा । ३५

3.5

अधुनातु ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । तमेव सर्वभावेन शरणं गच्छेति यदुक्तं तद्विवृणोति ॥ के
चिद्वर्णधर्माः ॥ केचिदाश्रमधर्माः ॥ केचित्सामान्यधर्माः ॥ इत्येवं सर्वानपि धर्मान्परित्यज्य ॥ विद्यमाना
नविद्यमानान्वा शरणत्वेनानादृत्य ॥ मामीश्वरमेकमद्वितीयं ॥ सर्वधर्माणामपि प्रातारं फलदातारं च श
रणं व्रज । धर्माः सन्तु मा वा ॥ किं तैरन्यसापेक्षैः भगवदनुग्रहादेव तु । अन्यनिरपेक्षादहं कृतार्थो भ
विष्यामीति निश्चयेन परमानंदघनमूर्तिमनंतं श्रीवासुदेवं भगवंतमनुक्षणभावनया भज इदमे
व परमं तत्त्वं नातोऽधिकमस्तीति विचारपूर्वकेण प्रेमप्रकर्षेण सर्वानात्मचिंताशून्यतया मनोवृत्त्या
तैलधारावदविच्छिन्नया सततं चिंतयेत्यर्थः । अत्र मामेकं शरणं व्रजेत्यनेनैव प्रकारेण ॥ सर्वध

सर्वधर्मान्परित्यज्य । मामेकं शरणं व्रज ॥ अहं त्वां सर्वपापेभ्यो । मोक्षयिष्यामि मा शुचः ॥

मेशरणतापरित्यागे लब्धे सर्वधर्मान्परित्यज्येति निषेधानुवादस्तत्कार्यकारितालाभायमज्ञाय ।
नीये । एवं कृत्वा कुर्यामित्यनगिरेति ब्रूयादितिवत् ॥ तथा च ममैव सर्वधर्मकार्यकारित्वान्मदेक
शरणस्य नास्ति धर्मापेक्षेत्यर्थः ॥ एतेनेदमपास्तं सर्वधर्मान्परित्यज्येत्युक्ते न धर्माणां परित्यागोल
भ्यते अतो धर्मपदं कर्ममात्रपरमिति । नह्यत्र कर्मत्यागो विधीयते । अपितु विद्यमानेऽपि कर्मणि त
ज्ज्ञानादेरेण भगवदेकशरणमात्रं ब्रह्मचारिगृहस्थवानप्रस्थभिक्षूणां साधारणं विधीयते । तत्र
सर्वधर्मान्परित्यज्येति तेषां स्वधर्मादरत्वसंभवे न तन्निवारणार्थं अधर्मे वानर्थफलके स्याप्यादरा
भावात्तत्परित्यागवचनमनर्थकमेव शास्त्रेणाप्राप्तत्वाच्च ॥ तस्माद्वर्णाश्रमधर्माणामभ्युद ॥ ॥

इतिधर्मि
मिराकृणी
तोयरेन=

मं
सर्वधर्मका
र्यकारितत्त्वेन
स्वानि तत्का
रिता = ८

गीटी॰
अ॰१८॰
३६

यद्येवं तर्हि प्रसिद्धे मोक्षहेतुत्वमपि स्यादिति शंकानिराकरणार्थमेवैतद्वच इति न्याय्यं न च सर्व[illegible]मार्थमप
रित्यागोत्र विधीयते ॥ सन्न्यासशास्त्रेण प्रतिषेधशास्त्रेण च लब्धत्वादेव ॥ न चेदमपि सन्न्यासशास्त्रं
भगवदेकशरणताया विधित्सितत्वात् ॥ तस्मात्सर्वधर्मान्परित्यज्येत्यनुवाद एव सर्वेषां न शास्त्राणां
परमरहस्यमीश्वरशरणतैवेति ॥ तत्रैव शास्त्रपरिसमाप्तिर्भगवता कृता । तामन्तरेण सन्न्यासस्या
पि स्वफलापर्यवसायित्वात् । अर्जुनं च क्षत्रियं सन्न्यासानधिकारिणं प्रति सन्न्यासोपदेशायोगा
त् ॥ अर्जुनव्याजेनान्यस्योपदेशे न वक्तव्यमिति हितं ॥ त्वां मोक्षयिष्यामि सर्वपापेभ्यः त्वमा शुच
इति चोपक्रमोपसंहारे न स्यातां ॥ तस्मात्सन्न्यासधर्मेष्वपि स्मरणादरेण मदेकशरणतामात्रे तात्प
र्यं भगवतः । यस्मात्त्वं मदेकशरणः सर्वधर्मानादरेणातोहं सर्वधर्मकार्यकारी त्वां सर्वपापेभ्यो मो
क्षयिष्यामि एवं पृथुवयादिति मित्रप्रत्यवायात्कथं निस्तारः स्यादिति शोकं मा कार्षीः भाष्यकारैर्निर
स्ता निष्कुमतानीह विस्तरात् ॥ ग्रंथव्याख्यानमात्रार्थिना तदर्थमिह यते ॥ तस्यैवाहं ममैवासौ स एवा
हमिति त्रिधा ॥ भगवच्छरणत्वं स्यात्साधनाभ्यासपाकतः ॥ विशेषो वर्णितोस्माभिः सर्वो भक्तिर
सायने ॥ ग्रंथविस्तरभीरुत्वादित्यात्र नेह कथ्यते ॥ तत्राद्यं तु यथा सत्यपि भेदापगमे नाथ
तवाहं न मामकीनस्त्वं । सामुद्रो हि तरंगः क्वचन समुद्रो न तारंगः । द्वितीयमप्युक्तं यथा ॥ हस्तमा
त्क्षिप्य यातोसि बलात्कृष्ण किमद्भुतं ॥ हृदयाद्यदि निर्यासि पौरुषं गणयामि ते ॥ तृतीयमपि मात्रे
यथा ॥ सकलमिदमहं च वासुदेवः परमपुमान्परमेश्वरः स एकः । इति मतिरचला भवत्यनंते
हृदयगते व्रज तान्विहाय दूरादिति हते प्रतियमवचनं । अंबरीषप्रह्लादगोपीप्रभृतयस्त्वासां

कारणं विनापि स्वाभाविकस्नेहवतां

व हितमुक्तं च बहुधा। न च कर्मनिष्ठा सर्वकर्मसंन्यासपर्यंता उपसंहृता स्वकर्मणा तमभ्यर्च्य सिद्धिं विंद
ति मानव इत्यत्र॥ संन्यासपूर्वकश्रवणादिपरिपाकसहिता ज्ञाननिष्ठोपसंहृता। ततो मां तत्त्वतो ज्ञा
त्वा विशते तदनंतरमित्यत्र॥ भगवद्भक्तिनिष्ठा तु उभयसाधनभूता उभयफलभूता च भवतीत्यनु
पसंहृता॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजेत्यत्र भाष्यकृतस्तु॥ सर्वधर्मान्परित्यज्येति। सर्व
कर्मसंन्यासानुवादेन मामेकं शरणं व्रजेति॥ ज्ञाननिष्ठोपसंहृतेत्याहुः॥ भगवद्धर्मप्रायवर्ण
गि नैकविषयं वराकाः वचो यद्गीताख्यं परमपुरुषस्यागममिदं तदेतत्संतव्याख्यामनतिनिपुणाः को वितनुतां
श्रद्धत्वेतद्बाल्यं यदिह कृतवानस्मि कथमप्यहेतुस्नेहानां तदपि कृतकार्यैव महतां॥ ६७॥ समाप्तः
शास्त्रार्थः॥ शास्त्रसंप्रदायविधिमधुना कथयति॥ इदं गीताख्यं सर्वशास्त्ररहस्यं तव संसारविच्छित्त्या
ये मयोक्तं॥ नातपस्काय तपोरहिताय ते येतद्द्वया न वाच्यं कदाचन॥ कस्यामप्यवस्थायामिति।
इदं ते नातपस्काय नाभक्ताय कदाचन॥ न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ६८॥
पथ्ययत्नेयपि संवध्यते॥ तपस्विने भक्ताय। गुरौ देवे च भक्तिरहिताय न वाच्यं कदाचन तपस्विने भ
क्तायापि अशुश्रूषवे शुश्रूषां परिचर्यामकुर्वते च न वाच्यं कदाचन॥ च शब्दो वाच्यमिति कदाचनेति
पदद्वयाकर्षणार्थः॥ न च मां योऽभ्यसूयति। मां भगवंतं वासुदेवं मनुष्यमसर्वज्ञत्वादिगुणकं मत्वाऽ
भ्यसूयति आत्मप्रशंसादिदोषाध्यारोपणेनेश्वरत्वमसहमानो द्वेष्टि तस्मै श्रीकृष्णोत्कर्षासहिष्ण
वे तपस्विने भक्ताय शुश्रूषवेपि न वाच्यं कदाचनेत्यनुकर्षणार्थश्चकारः। तपस्विने भक्ताय शुश्रूष
वे श्रीकृष्णानुरक्ताय च वाच्यमित्यर्थः॥ एकैकविशेषणाभावेप्ययोग्यताप्रतिपादनार्थाः चत्वारोन

[illegible]

गीटी॰ अ॰१८ ३७ 37

शुश्रूषागुरुभक्तिभगवदनुरक्तियुक्तायतपस्विनेनरूक्तायेमेधाविनेवाच्यमेयातपसोःयाद्विकत्वे
पिभगवदनुरक्तिशुश्रूषाराणांनियमएवेतिभाष्यकृतः॥ एवंसंप्रदायस्यविधिमुक्त्वातत्कर्तुःफ
लमाह॥६८॥ यःसंप्रदायस्यप्रवर्तकःइममावयोःसंवादरूपंग्रंथंपरमंनिरतिशयपुरुषार्थसाधनं
गुह्यंरहस्यात्सर्वत्रप्रकाशयितुमनर्हंमद्भक्तेषुमांभगवंतंवासुदेवंप्रत्यनुरक्तेष्वाभिधास्यति॥ अ
भितःग्रंथतःअर्थतश्चधास्यतिव्याख्यास्यतीतिभक्तेःपुनर्ग्रहणात्सर्वोत्कृष्टविशेषणत्रयरहितस्यापि
भगवद्भक्तिमात्रेणपात्रतासूचिताभवति॥ कथमभिधास्यतीत्यत्राह॥ भक्तिंमयिपरांकृत्वाभगव
तःपरमगुरोःशुश्रूषैवेयंमयाक्रियतइत्येवंविधयाभिधास्यतिसमामेवैष्यतिमांभगवन्तंवा
सुदेवमेष्यत्येवाचिरात्मोक्ष्यतएवसंसारादत्रसंशयोनकर्तव्यः॥ अथवामयिपरांभक्तिंकृत्वा

यइमंपरमंगुह्यं॥ मद्भक्तेष्वभिधास्यति। भक्तिंमयिपरांकृत्वामामेवैष्यत्यसंशयः ६८।
नचतस्मान्मनुष्येषुकश्चिन्मेप्रियकृत्तमः॥ भविताचमेतस्मादन्यःप्रियतरोभुवि ६९।

असंशयः। अविद्यमानसंशयःसन्मामेवैष्यत्येवेतिवामामेवैष्यतिनान्यमितियथाश्रुतमेव
वायोज्यं। ६८॥ किंच॥ तस्मान्मद्भक्तेषुशास्त्रसंप्रदायकृतःसकाशादन्योमनुष्येषुमध्येक
श्चिदपिमेममप्रियकृत्तमःअतिशयेनप्रियकृन्मद्विषयप्रीत्यतिशयवान्॥ नास्तिवर्तमा
नेकालेनापिप्रागासीन्नाहकश्चित्॥ नचकालांतरेभविताभविष्यति। ममापितस्मादन्यः
प्रियतरःप्रीत्यतिशयविषयःकश्चिदपितासीत्॥ अधुनाचभुविलोकेस्मिन्नास्तिकालांतरे

अध्यायैकस्य फलमुक्त्वाऽध्येतुः फलमाह । आवयोः संवादमिमं ग्रन्थं धर्म्यं धर्मादनपेतं यः अध्येष्य
ते जपरूपेण पठिष्यति ॥ ज्ञानयज्ञेन ज्ञानात्मकेन यज्ञेन च तेनाध्यायोक्तेन द्रव्ययज्ञादिभ्यः श्रे
ष्ठेनाहं । सर्वेश्वरः तेनाध्येत्राऽहं इष्टः पूजितः स्यामिति मे मतिः मम निश्चयः यः पद्यपद्ये गीतार्थम
तथापि नुष्ठानमानः एव जपति तेन कृतार्थो मम ॥ मामेवासौ प्रकाशयतीति बुद्धिर्भवति ॥ अतो जपमात्रा
दपि ज्ञानयज्ञफलं मोक्षं लभते ॥ सत्त्वशुद्धिज्ञानोत्पत्तिद्वारा अर्थानुसंधानपूर्वकं पठतस्तु
साक्षादेव मोक्ष इति किं वक्तव्यमिति फलविधिरेवायं नार्थवादः ॥ अयानु द्रव्यमयाद्यज्ञा ।

अध्येष्यते च य इमं ॥ धर्म्यं संवादमावयोः ॥ ज्ञानयज्ञेन तेनाहम् । इष्टः स्यामिति मे मतिः
श्रद्धावाननसूयश्च ॥ शृणुयादपि यो नरः । सोऽपि मुक्तः शुभांल्लोकान् ॥ प्राप्नुयात्पुण्यक
र्मणाम् । ७२ ॥

ज्ञानयज्ञः परं तपेति हि प्राग्युक्तं । ७१ ॥ प्रवक्तुरध्येतुश्च फलमुक्त्वा श्रोतुरिदानीं फलं कथयति
यो नरः कश्चिदप्यन्यस्याऽध्येतुर्जपतः कारुणिकस्य सकाशात् श्रद्धावान् श्रद्धायुक्तः तथा किमपी
मयमध्येतुर्जपति अवबुद्ध्वा जपतीति दोषदृष्ट्याऽसूयया रहितः । अनसूयश्च केवलं शृणुयादपि
मे ग्रन्थमपि शब्दात्किमुतार्थज्ञानवान् ॥ सोऽपि केवलाक्षरमात्रश्रोतापि मुक्तः पापैः शुभान्प्रश
स्तांल्लोकान् पुण्यकर्मणामश्वमेधादिकृतां प्राप्नुयात् । ज्ञानवतस्तु किं वाच्यमिति भावः । ७२ ।

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा कच्चिदज्ञानसंमोहः प्रणष्टो धनंजय ^ ६०

शिष्यस्य ज्ञानोत्पत्तिपर्यंतं गुरुणा कारुणिकेन प्रयासः कार्य इति गुरोर्धर्मं शिक्षयितुं सर्वज्ञोपि पुनरुप
देशाय ज्ञानाप्तीति ज्ञापनाय पृच्छति ॥ कच्चिदिति प्रश्नद्वयं ॥ एतन्मयोक्तं गीताशास्त्रं एकाग्रेण व्यासंग
गीटी॰ मध्य॰ ३८ रहितेन चेतसा हे पार्थ त्वया किं श्रुतं अर्पितो ऽवधारितं कच्चित् ॥ किमज्ञानसंमोहः अज्ञाननिमित्तः
संमोहो विपर्ययः अज्ञाननाशात्प्रणष्टः प्रकर्षेण पुनरुत्पत्तिविरोधित्वेन नष्टः तेन वा हे धनंजय
यदि स्यात् ॥ पुनरुपदेशं करिष्यामीत्यभिप्रायः । ७२ ॥ एवं पृष्टः कृतार्थत्वेन पुनरुपदेशानपेक्ष
मात्मानं अर्जुन उवाच ॥ नष्ट इति ॥ मोहः अज्ञानकृतो विपर्ययः तन्नाशकमाह ॥ स्मृतिर्लब्धा
38 त्वत्प्रसादात् मया यस्मात्त्वदुपदेशादात्मज्ञानं लब्धं सर्वसंशयानाक्रांततया प्राप्तमतः सर्वत्र प्र

अर्जुन उवाच ॥ नष्टो मोहः स्मृतिर्लब्धा ॥ त्वत्प्रसादान्मयाच्युत ॥
स्थितोस्मि गतसंदेहः करिष्ये वचनं तव ॥ ७३ ॥ ॥

तिबंधस्तेनात्मज्ञानेन मोहो नष्ट इत्यर्थः ॥ हे अच्युत आत्मत्वेन निश्चितत्वाद्धि योगायोगप स्मृति
र्लेभे सर्वग्रंथीनां विप्रमोक्ष इति श्रुत्यर्थमनुवदन्नाह ॥ स्थितोस्मि गतसंदेहः निवृत्तसर्वसंदेहः
स्थितोस्मि युद्धकर्तव्यतारूपे त्वच्छासने यावज्जीवं च ॥ करिष्ये वचनं तव भगवतः परमगुरोराज्ञां
पालयिष्यामीति प्रयाससाफल्यकथनेन भगवंतमर्जुनः परितोषयामास । अनेन गीताशा
स्त्रव्याख्यातो भगवत्प्रसादादवश्यं मोक्षफलपर्यंतं ज्ञानं भवतीति शास्त्रफलमुपसंहृतं । तद्वा

समाप्तः शास्त्रार्थः कथासंबंधमिदानीमनुसंदधानः । संजय उवाच । अद्भुतं चेतसो विस्मयाख्यविकार
करं ॥ लोकेष्वसंभाव्यमानत्वाद्रोमहर्षणं ॥ शरीरस्य रोमांचाख्यविकारकारित्वेनातिपरिपुष्टत्वं वि
स्मयस्य दर्शितं ॥ स्पष्टमन्यत् । ७५ ॥ व्यवहितस्यापि भगवदर्जुनसंवादस्य श्रवणयोग्यतामात्मन आ
ह ॥ व्यासदत्तदिव्यचक्षुःश्रोत्रादिलाभरूपाद्व्यासप्रसादादिमं परं गुह्यं योगं योगाव्यभिचारिहे
तुं संवादं योगेश्वरात्कृष्णात्स्वयमेवमपारमेश्वरेण रूपेण कथयतः ॥ साक्षाद्देवादहं श्रुतवान् ।

संजय उवाच ॥ इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ॥ संवादमिममश्रौषमद्भुतं रो
महर्षणम् । ७५ ॥ व्यासप्रसादाच्छ्रुतवानिमं गुह्यमहं परम् ॥ योगं योगेश्वरात्कृष्णात्सा
क्षात्कथयतः स्वयम् ॥ ७६ ॥ राजन्संस्मृत्य संस्मृत्य । संवादमिममद्भुतं ॥ केश
वार्जुनयोः पुण्यं । हृष्यामि च मुहुर्मुहुः । ७७ ॥

स्मिन्परं परयेति स्वभागमभिनेदत्यत्रेममिति लिंगपाठो भाष्यकारैर्व्याख्यातः एतदिति नपुंस
कलिंगपाठस्त्वेवयोगाख्याद्वसमानाधिकरणत्वव्याख्यानमिदमिति व्याख्यातारः ॥ ७६ । पुण्यं श्र
वणेनापि सर्वपापहरं केशवार्जुनयोरिमं संवादमद्भुतं केवलं श्रुतवानस्मि किं तु संस्मृत्य सं
स्मृत्य संभ्रमेणाहितकृतिः मुहुर्मुहुर्वारंवारं हृष्यामि च हर्षं प्राप्नोमि च प्रतिक्षणं रोमांचितो भवा

गी॰टी॰
म॰अ॰
३९

यद्विश्वरूपाख्यं सगुणं रूपमर्जुनाय ध्यानार्थं भगवान्दर्शयामास तदिदानीमनुसंदधान आह तद्
विश्वरूपं हे राजन् मम महान्विस्मयः अत एव हृष्यामि चाहं स्पष्टमत्यन्त ॥ ७८ ॥ एवं च सति त्वत्पु
त्रे विजयादिसंभावनां परित्यजेत्याह ॥ यत्र यस्मिन् युधिष्ठिरपक्षे योगेश्वरः सर्वयोगसिद्धाना
मीश्वरः सर्वज्ञः सर्वशक्तिर्भगवान् श्रीकृष्णः भक्तदुःखाकर्षणास्तिष्ठति नारायणः ॥ यत्र पा
र्थो धनुर्धरः यत्र गांडीवधन्वा तिष्ठत्यर्जुनो नरः ॥ तत्र नरनारायणाधिष्ठिते तस्मिन् युधिष्ठिरे

तच्च संस्मृत्य संस्मृत्य । रूपमत्यद्भुतं हरेः । विस्मयो मे महान्राजन् । हृष्यामि च पुनः पुनः ७८
यत्र योगेश्वरः कृष्णो ॥ यत्र पार्थो धनुर्धरः ॥ तत्र श्रीर्विजयो भूति ॥ र्ध्रुवा नीतिर्मतिर्मम । ७९

तस्मिन् युधिष्ठिरपक्षे श्रीराज्यलक्ष्मीः विजयः शत्रुपराजय तिमित्र उत्कर्षः भूतिरुत्तरोत्तरं रा
ज्यलक्ष्म्या विवृद्धिः ध्रुवा अवश्यंभाविनी ध्रुवा इत्यनेन सर्वत्र संबध्यते नीतिः नयः एवं मम मतिर्निश्च
यः तस्मात् । दृष्यापुत्रविजयाशां त्यक्त्वा । श्रीभगवदनुगृहीतैर्लक्ष्मीविजयादिभागिभिः पांडवैः

३९

गी॰टी॰ म॰अ॰ ८०

वंशीविभूषितकरान्नवनीरदाभात् ॥ पीतांबरादरुणबिंबफलाधरोष्ठात् ॥ पूर्णेंदुसुंदरमु
खादरविंदनेत्रात्कृष्णात्परं किमपि तत्त्वमहं न जाने ॥ १ ॥ कोऽप्यत्र यात्मकं शास्त्रं ॥ गीताख्यं ये
न निर्मितं ॥ आदिमध्यांतषट्केषु ॥ तस्मै भगवते नमः ॥ २ ॥ श्रीगोविंदमुखारविंदमधुना ।
मिष्टं महाभारते ॥ गीताख्यं परमं रहस्यमृषिणा व्यासेन विख्यापितं ॥ व्याख्यातं भगवत्पदैः
प्रतिपदं श्रीशंकराख्यैः पुनः ॥ विस्पष्टं मधुसूदनेन मुनिना स्वाज्ञानशुद्ध्यै कृतं । ३ । इह यो।
स्ति विमोहयन्मनः परमानंदघनः सनातनः ॥ गुणदोषवदेषयवनस्तरणान्नल्पो यदयं स्व
यंजनः ॥ ४ । श्रीरामविश्वेश्वरमाधवानां ॥ प्रसादमासाद्य मया गुरूणां ॥ व्याख्यानमेतद्वि
हितं सुबोधं समर्पितं तच्चरणांबुजेषु ॥ ५ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यव
र्य्यश्रीविश्वेश्वरसरस्वतीश्रीपादशिष्यश्रीमधुसूदनसरस्वतीविरचितायां श्री
भगवद्गीतागूढार्थदीपिकायां मोक्षयोगो नामाष्टादशोऽध्यायः ॥ १८ ॥ ॥
इति न्त्रीयं ज्ञानकांडं समाप्तम् ॥ संपूर्णा चेयं भगवद्गीताटीकेत्योम् ॥ ६ शुभमस्तु ॥ ६ ८०